दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिकशुक्लत्रयोदशी
मार्गशीर्ष 07 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-13 ■ वर्ष-6 ■ अङ्क-26 | 1 | नवम्बर 22, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 बिहारस्य वैशाली-जनपदे प्रायः सप्तत्युत्तरचतुःशताधिक-चतुस्त्रिंशत्-सहस्र-कोटिरूप्यकाणां विकास-परियोजनाः

4 काश्याः पुण्यधरणीतः राज्यपालायै श्रीमती-आनन्दीबेन-पटेल-महोदयायै जन्मदिवसस्य शुभकामनाः — कुलपतिः प्रो. बिहारीलालशर्मा

12 जनगणना-निर्वाचनकार्येषु नियुक्तान् शिक्षकान् विद्यालयीयकार्येभ्यः कार्यमुक्तान् कर्तुं शिक्षकसङ्घस्य आग्रहः, जिलाधिकारिणे समर्पितं ज्ञापनम्

सुभाषितम्

आदौ नम्राः पुनर्वक्राः स्वीयकार्येषु तत्पराः।
कार्यान्ते च पुनर्नम्राः काण्डवास्तु प्राणघातकाः।।

भावार्थः- प्रारम्भ में वे नम्र व्यवहार करते हैं, परन्तु अपने उद्देश्य को पूरा करने लिये वे कुटिल बन जाते हैं। अपना कार्य पूरा होने के बाद वे पुनः नम्र बन जाते हैं। ऐसे कुटिल व्यक्ति एक धनुषधारी के समान प्राणघातक होते हैं।

उत्तरप्रदेशस्य मुख्यमन्त्रिणा महन्तेन योगी-आदित्यनाथेन मातुः सावित्रीदेव्याः अन्त्ययात्रायां सम्मिल्य तस्याः अन्त्येष्टिसंस्कारः सम्पन्नः कारितः



हरिद्वारम्। उत्तरप्रदेशस्य मुख्यमन्त्रिणा महन्तेन योगी-आदित्यनाथेन मातुः सावित्रीदेव्याः अन्त्ययात्रायां सहभागितां कृत्वा तस्याः अन्त्येष्टिसंस्कारः सम्पन्नः कारितः। भावुकेन मनसा मातुः मुखाग्निसंस्कारे उपस्थिताभ्यां मुख्यमन्त्रिणा योगिना सह उत्तरप्रदेशस्य उत्तराखण्डस्य च समग्रमन्त्रिमण्डलेन अतिरिक्तम् उभयोः राज्ययोः शीर्षपदाधिकारिभिः समाजसेविभिश्च पुष्पचक्रम् अर्पयित्वा श्रद्धांजलिः प्रदत्ता। प्रातः प्रायः दशवादने (१० वादने) हरिद्वारस्य नमामि-गङ्गे-घट्टे पार्थिवशरीरेण सह प्राप्तस्य योगी-आदित्यनाथस्य देशस्य विभिन्नभागेभ्यः आगतानां राजनेतॄणां च सुरक्षायां कठोरनिरीक्षणं सुदृढा व्यवस्था च आसीत्। उत्तराखण्डस्य मुख्यमन्त्रिणा पुष्करसिंहधामिना अपि मुख्यमन्त्रिणः योगी-आदित्यनाथस्य मात्रे सावित्रीदेव्यै श्रद्धांजलिः अर्पिता। अन्त्येष्टिसंस्कारः नमामि-गङ्गे-घट्टे वैदिकमन्त्रोच्चारेण धार्मिकविधिविधानेन च सह सम्पन्नः अभवत्। योगी-आदित्यनाथस्य अनुजेन महेन्द्रबिष्टेन मात्रे मुखाग्निः प्रदत्तः। अन्त्येष्टिसंस्कारस्य सम्पूर्णा व्यवस्था संयोजनं च स्वामिना रामदेवेन आचार्येण बालकृष्णेन च कृतम्। अस्मिन् वैदिकपद्धत्या सह अन्त्येष्टिसंस्कारः सम्पन्नः कारितः। आचार्यः बालकृष्णः अवदत् यत् अन्त्येष्टेः अर्थः षोडशेन अन्तिमसंस्कारेण च सम्बद्धः अस्ति। अयं यज्ञः सर्वमहान्तमः भवति। अस्मिन् समिधादिकं प्रक्षिप्य आत्मना विरक्तं शरीरम् अग्नये समर्प्यते।

मुख्यमन्त्रिणा धामिना शोकसंवेदनाः प्रकटिताः

अपरत्र, मुख्यमन्त्रिणा पुष्करसिंहधामिना योगी-आदित्यनाथेन तस्य परिजनैश्च सह मिलित्वा गभीराः शोकसंवेदनाः व्यक्ताः। सः अवदत् यत् मातुः स्नेहः, आशीर्वादः मार्गदर्शनं च जीवनस्य अमूल्या निधिः अस्ति। मुख्यमन्त्रिणा पुष्करसिंहधामिना सावित्रीदेव्याः निधनं परिवारस्य कृते अपूरणीया क्षतिः इति उक्तम्। तेन बाबा-केदारात् दिवङ्गतात्मनः शान्त्यर्थं शोकसन्तप्तपरिवारस्य च दुःखसहनशक्तये प्रार्थना कृता। अस्मिन् अवसरे देशस्य विभिन्नभागेभ्यः अनेकजनप्रतिनिधयः, विभिन्नराज्यानां मन्त्रिणः प्रशासनिकाधिकारिणश्च उपस्थिताः आसन्। धार्मिक-आध्यात्मिक-जगतः विभूतिभिः सन्त-महात्मभिश्च अपि अन्तिमदर्शनं कृत्वा पुष्पांजलिः अर्पिता। सर्वैः दिवङ्गतात्मनः शान्त्यर्थं प्रार्थना कृता। अस्मिन् काले उत्तरप्रदेशसर्वकारस्य उपमुख्यमन्त्रिणौ बृजेशपाठकः केशवप्रसादमौर्यः च, केन्द्रीयमन्त्री पङ्कजचौधरी, उत्तराखण्डस्य सहप्रभारी बांसुरीस्वराज, उत्तरप्रदेशस्य मन्त्रिमण्डलसदस्याः स्वतन्त्रदेवसिंहः, दयाशङ्करसिंहः, धर्मपालसैनी, उत्तराखण्डस्य पूर्वमुख्यमन्त्रिणौ त्रिवेन्द्रसिंहरावतः रमेशपोखरियाल-'निशङ्कः' च, मुख्यसचिवः आनन्दवर्धनः, ए.डी.जी. ए.पी. अंशुमानः तथा च जिलाधिकारी मयूरदीक्षितः इत्यादयः अनेकप्रशासनिकाधिकारिणः उपस्थिताः आसन्।

सन्तसमाजेन प्रदत्ता हरिद्वारे श्रद्धांजलिः

अन्त्येष्टिसंस्कारे योगऋषिः स्वामी रामदेवः आचार्यः बालकृष्णश्च, श्रीमहन्तः डॉ. रवीन्द्रपुरी (निरञ्जनी), श्रीमहन्तः रवीन्द्रपुरीमहाराजः (महानिर्वाणी), स्वामी चिदानन्दसरस्वती, कल्किपीठाधीश्वरः आचार्यः प्रमोदकृष्णम्, महामण्डलेश्वरः डॉ. हरिचेतनानन्दः, रूपेन्द्रप्रकाशः, स्वामी दर्शनभारती, ललितानन्दगिरिमहाराजः, दिव्यप्रेमसेवामिशन-संस्थायाः संस्थापकः डॉ. आशीषगौतमः, विश्वहिन्दूपरिषदः अन्ताराष्ट्रियसंरक्षकः दिनेशः, मिश्री-मठस्य परमाध्यक्षः करौलीशङ्करमहादेवः च सहितं सर्वेषां त्रयोदश-अखाड़ानां (१३ अखाड़ानां) परमाध्यक्षैः वैदिकमन्त्रोच्चारस्य मध्ये अन्त्येष्टिसंस्कारः सम्पन्नः कारितः। हिमसंस्कृतवार्तापक्षतः शोकसंवेदना।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्तायां दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्राकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

संपादकगणः- डॉ.अमलदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्राणा, प्रचारगणः- जगदीश डाभी गुजरातम्, बृजेश कुमार पाण्डेयः, उ.प्र, सत्येन्द्रपाठकः उ.प्र, डा.विमलेश झा बिहारम्, डा.राधवनाथ झा बिहारम्, डॉ.पद्मनाभः हिमाचलम्, डा.निशिकान्त पाण्डेयः प.बंगाल, नवीन ममगाईं उत्तराखण्ड, कुलदीप मैन्दोला उत्तराखण्ड, डा.नवीनशर्मा हरियाणा, अजय कुमार आर्य पंजाब, ईशान तिवारी दिल्ली, रवि खरडिहालः कर्नाटक, डॉ.वर्षा टोणगांवकरः, सुधा साढवे महाराष्ट्रम्, ईदर धीरजः आन्ध्रप्रदेशः, नारद उपाध्यायः, डा.नयन ज्योति शर्मा असम

प्रधानमन्त्री नरेन्द्रमोदी बिहारस्य वैशाली-जनपदे प्रायः सप्तत्युत्तरचतुःशताधिक-चतुस्त्रिंशत्-सहस्र-कोटिरूप्यकाणां विकास-परियोजनाः उद्घाटितवान्



बिहार-राज्यस्य आधारभूत संरचनायै महतीं गतिं प्रददत् प्रधानमन्त्री नरेन्द्रमोदी वैशाली-जनपदे प्रायः-सप्तत्युत्तरचतुः शतोत्तर चतुस्त्रिंशत्-सहस्र कोटिरूप्यकाणां विविधाः विकास-परियोजनाः राष्ट्राय समर्पितवान्। एतासु परियोजनासु मार्ग-सम्पर्कः, ऊर्जा, नगर-संरचना, शिक्षा, स्वास्थ्य-सेवा, जल-संसाधनानि, परिवहनञ्श्चेत्यादीनि प्रमुखानि क्षेत्राणि समाविष्टानि सन्ति। प्रधानमन्त्रिणा गङ्गा-नद्याम् उपरि निर्मितः षड्-पथीयः 'नीतीश-सेतुः' राष्ट्राय समर्पितः। अनेन सेतुना महात्मा गान्धी-सेतु-जे.पी.-सेतु-इत्येतयोः यातायात-संमर्दः उपशमिष्यति, यात्रावधिः अल्पो भविष्यति, उत्तर-दक्षिण-बिहारयोः सम्पर्कश्च सुदृढीभविष्यतीति प्रत्याशितम्।

प्रधानमन्त्रिणा षट्शतोत्तर पञ्चदश-सहस्रकोटिरूप्यकाणां विकास-परियोजनानाम् उद्घाटनं कृतम्, यासु प्रमुख-मार्ग-परियोजनाः, बक्सर-तापीय-विद्युत् परियोजनायाः षट् षष्ट्युत्तर षट्शत-मेगावाट्-मितं द्वितीयम् एककम्, विद्युत् वितरण कार्याणि च अन्तर्भूतानि सन्ति। तेन सिञ्चन-शिक्षा-स्वास्थ्य-नगरविकास-सम्बद्धानाम् अवसंरचनाणाम् अपि उद्घाटनं विहितम्। तेन प्रायः पञ्चाशतोत्तरचतुःशताधिक चतुर्दश-सहस्रकोटिरूप्यकाणां परियोजनानां शिलान्यासः अपि विहितः। अन्येषु उपक्रमेषु नहर-आधुनिकीकरणम्, शैक्षणिक संस्थानानि, भारतीय प्रौद्योगिकी-संस्थान-पटना-इत्यस्य अनुसन्धान-पार्क-छात्रावासौ, आपत्कालीन प्रतिक्रिया-अवसंरचना च समाविष्टाः सन्ति। प्रधानमन्त्रिणा शतं विद्युत-चालित-लोकयानानि-ध्वज-प्रदर्शनेन प्रस्थापितानि, प्रधानमन्त्री आवास योजना-नगर-अन्तर्गतं लाभार्थिनां गृहप्रवेश-समारोहे च तेन सहभागिता कृता। एताभिः परियोजनाभिः बिहार-राज्यस्य सर्वत्र आधारभूत संरचना सुदृढा भविष्यति, जनसेवाः परिष्कृताः भविष्यन्ति, आर्थिक विकासश्च त्वरितो भविष्यतीति अपेक्ष्यते।

राष्ट्र-प्रगति-सञ्चालनाय स्व-निर्मित-सीमाभ्यः ऊर्ध्वम् उत्थातुं प्रधानमन्त्रिणः युवभ्यः आह्वानम्

प्रधानमन्त्री नरेन्द्रमोदी खड्गपुर-स्थितस्य भारतीय-प्रौद्योगिकी-संस्थानस्य पञ्चसप्तति-वर्ष-पूर्ति-समारोहे सङ्कुचित-चिन्तन-परिधिम् उल्लङ्घ्य नूतन सम्भावना-द्वारोद्घाटनाय यूनः आहूतवान्। असौ प्रावोचत् यत् परिमित-धारणाः न केवलं स्वप्न-प्रतिभा प्रस्फुटनं नियन्त्रयन्ति, अपितु राष्ट्र-सामर्थ्यमपि सङ्कोचयन्ति। विश्व-वित्तकोश-प्रतिवेदनम् उपन्यस्य तेन प्रतिपादितं यत् विगत-द्वादश-त्रयोदश-वर्षावधौ प्रायः पञ्चाशत्-कोटि-परिमिताः भारतीयाः दारिद्र्य-पङ्कात् समुद्धृताः, यत्तु परिसीमातिक्रमण-शीलस्य असाध्य-साधकस्य च दृढ सङ्कल्पस्यैव प्रत्यक्षं फलम् अस्ति। भारतस्य नवोन्मेष-परिवेश-निर्माणे संस्थानस्यास्य आधारभूतां भूमिकां श्लाघमानः सः आत्म-कल्पित-मर्यादाभ्यः ऊर्ध्वम् उत्थाय राष्ट्र-प्रगति-सञ्चालनाय 'राष्ट्र सर्वप्रथमम्' इति मन्त्रेण अग्रे गन्तुं छात्रान् प्रैरयत्।

काश्मीर-उपत्यकायां कोऽपि स्थानीयः युवा आतङ्कवादी गतिविधिषु संलग्नः नास्तीति गौरवस्य विषयः – गृहमंत्री अमितशाहः



केन्द्रीय-गृहमन्त्री अमितशाहः अवोचत् यत् सप्तत्यधिक-त्रिशततमस्य अनुच्छेदस्य समाप्तेः अनन्तरं कश्मीर-प्रदेशस्य युवसु पृथक्तावादस्य भावना इतः परं न विद्यते। गृहमन्त्री प्रतिपादितवान् यत् अस्माकं सर्वेषां देशस्य च कृते अयं महतः गर्वस्य विषयः अस्ति यत् उपत्यकायां यः कश्चिदपि कश्मीरी युवा आतङ्कवादी-गतिविधिषु संलग्नः नास्ति। कश्मीर-उपत्यकायां लश्कर-ए-तैयबा-सङ्घटनस्य अन्तिमस्य स्थानीय-कमाण्डर्-आतङ्कवादिनः संहारस्य चर्चा कुर्वन् श्रीशाहः इमां घटनाम् उपत्यकायां पृथक्तावाद-विचारस्य अन्त्यस्य प्रारम्भः इति निरूपितवान्।

बन्दरदेवा-स्थाने अरुणाचलप्रदेश-आरक्षकाणां दलाय राष्ट्रपति-ध्वज-प्रदानम्

गृहमन्त्री बन्देरदेवास्थे आरक्षि-प्रशिक्षण केन्द्रे आयोजिते एकस्मिन् समारोहे अरुणाचल-प्रदेश-आरक्षि-बलं प्रतिष्ठितेन राष्ट्रपतेः आरक्षि-ध्वज-सम्मानेन अपि अलङ्कृतवान्। अवधेयमिदं यत् केन्द्रीय गृहमन्त्री राज्यस्य त्रिदिवसीय प्रवासाय अरुणाचल प्रदेशं प्राप्तवान्।

क्रिकेट-स्पर्धायां भारतं

अष्टादशोत्तरैकशत-धावनाङ्कानाम् आधिक्यं प्राप्तवत्; तृतीय-दिवसस्य अन्ते षडाशीत्यधिकचतुःशत धावनाङ्कः। के.एल्. राहुलेन च भव्यं शतकं विरचितम्



वेलिङ्ग्टन्-नगरस्य बेसिन् रिज़र्व-क्रीडाङ्गणे न्यूजीलैण्ड-दलं विरुध्य प्रथम-टेस्ट्-क्रीडायाः तृतीय-दिवसस्य समाप्तौ भारतेन चतुर्णां क्रीडकानां हानौ षडशीत्यधिक-चतुःशतं धावनाङ्काः समर्जिताः। के.एल. राहुलः ऐतिहासिकं शतकं संस्थाप्य नव-चतुष्काणां द्वयोः षट्कयोः च साहाय्येन नवत्यधिक-द्विशतं कन्दुकेषु षट्त्रिंशदधिक-शतं धावनाङ्कानां भव्यां क्रीडां प्रदर्शितवान्। अनेनैव सह राहुलः दक्षिण अफ्रीका, इङ्ग्लैण्ड्, न्यूजीलैण्ड्, ऑस्ट्रेलिया च इत्याख्येषु देशेषु टेस्ट-शतकं निर्मातुं प्रथम-भारतीयः प्रारम्भिक-क्रीडकः अभवत्।

द्विपक्षीय-सम्बन्धेषु नूतन-गतिशीलतायै भारत-यूरोपीय-सङ्घ-मुक्त-व्यापार-सन्धिः आशु प्रवर्तिष्यतेति डॉ. जयशङ्करः



विदेशमन्त्री डॉ.एस. जयशङ्करः नवदेहल्यां बुल्गारिया-देशस्य विदेशमन्त्रिणा वेलिस्लावा-पेत्रोवा-चमोवा इत्यनया सह द्विपक्षीयं वार्तालापं कृतवान्। स्वकीये प्रारम्भिक-वक्तव्ये डॉ. जयशङ्करः अवोचत् यत् भारत-यूरोपीय-सङ्घयोः मुक्त-व्यापार-सन्धिः शीघ्रमेव प्रभावी भविष्यति, येन निश्चयेन सम्बन्धेषु नूतना गतिशीलता प्राप्स्यते। सः अवदत् यत् व्यापारः, प्रौद्योगिकी, प्रतिभा च इत्यादिषु क्षेत्रेषु भारतं यूरोपमहाद्वीपेन सह अधिकं कार्यं कर्तुम् उत्सुकमस्ति । डॉ. जयशङ्करः प्रतिपादितवान् यत् भारतेन यूरोपीय-सङ्घेन च एकस्यां सुरक्षा-रक्षा-सहभागितायां अथ गतिशीलतायाः रूपरेखायां अपि हस्ताक्षराणि कृतानि। अस्मिन् वर्षे जून-मासे बुल्गारिया-देशस्य राजधान्याः सोफिया-नगरस्य स्वकीयां यात्रां संस्मरन् डॉ. जयशङ्करः अवदत् यत् तस्य यात्रा द्वयोः देशयोः सम्बन्धेभ्यः नूतनाम् ऊर्जा गतिं च प्रदातुम् अत्यन्त-सहायिका सिद्धा।

प्राचीनमानवप्रवासस्य इतिहासे भारतस्य महत्त्वपूर्णा भूमिका,

बी.एच.यू.-वैज्ञानिकानां नूतन-डी.एन.ए.-अध्ययने अभवत् उद्घाटनम्



वाराणसी। मानवविकासस्य प्राचीनप्रवासस्य च इतिहासम् अधिकृत्य कृते एकस्मिन् नूतन-डी.एन.ए.-अध्ययने भारतस्य महत्त्वपूर्णा भूमिका सम्मुखे आगता अस्ति। काशीहिन्दूविश्वविद्यालयस्य (बी.एच.यू.) वैज्ञानिकैः षड्भिः अन्ताराष्ट्रियसंस्थानैः सह मिलित्वा कृते शोधे आनुवंशिकसाक्ष्याणि सङ्गृहीतानि, यानि दर्शयन्ति यत् प्राचीनभारतीय-उपमहाद्वीपात् मानवसमूहाः दक्षिण-पूर्व-एशियायाः थाईलैण्ड-इण्डोनेशिया-देशौ पर्यन्तं प्राप्तवन्तः आसन्। प्रतिष्ठितायां वैज्ञानिकपत्रिकायां 'माइटोकॉण्ड्रिया' इत्यस्यां प्रकाशितम् इदम् अध्ययनं मातृवंशमाध्यमेन वंशपरम्परया हस्तान्तरितस्य माइटोकॉण्ड्रियल्-डी.एन.ए.-इत्यस्य विशिष्टसमूहस्य 'हैप्लोग्रुप R30' इत्यस्य विश्लेषणे आधारितम् अस्ति। शोधस्य प्रथमलेखकस्य शैलेशदेसाई-महोदयस्य अनुसारम्, अध्ययनस्य प्रमुखः निष्कर्षः भारतीय-उपमहाद्वीपस्य दक्षिण-पूर्व-एशियायाः च मध्ये सहस्रवर्षप्राचीनमानवसम्पर्काणाम् आनुवंशिकप्रमाणस्य प्राप्तिः अस्ति। विश्लेषणे इदं स्पष्टम् अभवत् यत् 'R30' इत्यस्य एका विशिष्टा वंशावली प्रायः ४५,५०० वर्षेभ्यः पूर्वं भारतीयशाखातः पृथक् भूत्वा थाईलैण्ड-देशं प्राप्तवती आसीत्, यदा तु अस्य एका अपरा वंशावली प्रायः २७,००० वर्षेभ्यः पूर्वं भारतात् इण्डोनेशिया-देशं प्रति गतवती आसीत्। अनेन सङ्केतः मिलति यत् एतेषां क्षेत्राणां मध्ये मानवप्रवासस्य सम्पर्कस्य च प्रक्रिया कस्याम् अपि एकस्यां घटनायां सीमिता नासीत्, अपितु दीर्घकालं यावत् निरन्तरं प्रचलति स्म। शोधकर्तृणां मतानुसारं, 'R30' हैप्लोग्रुप प्राचीनदक्षिणमार्गेण दक्षिण-एशियायाः दक्षिण-पूर्व-एशियायाः च मध्ये आनुवंशिकसम्बन्धानां महत्त्वपूर्णं प्रमाणं प्रस्तौति। बी.एच.यू.-विश्वविद्यालयस्य आनुवंशिकीविज्ञानी (जीनविज्ञानी) प्रोफेसर ज्ञानेश्वरचौबे-महोदयः अवदत् यत् अस्य हैप्लोग्रुप-समूहस्य मूलोत्पत्तिः प्रायः ५० सहस्रवर्षेभ्यः पूर्वं भारतीय-उपमहाद्वीपे अभवत्। अध्ययनस्य अनुसारम्, अस्य प्रारम्भिकवंशावल्याः विकासः उत्तरभारते अभवत् तथा च अस्य कालखण्डः प्रायः ४४ सहस्रवर्षेभ्यः पूर्वं स्वीकृतः अस्ति। अध्ययने इदम् अपि प्रतिपादितं यत् अन्तिमहिमयुगस्य समये तदनन्तरं च जलवायुपरिवर्तनेन सह प्रायः १६,७०० वर्षेभ्यः पूर्वं प्राचीनमानवसमूहाः उत्तरभारतात् दक्षिणभारतं प्रति गन्तुम् आरभन्त। अनुकूलजलवायोः संसाधनानां च अन्वेषणे कृतेन अनेन प्रवासेन अग्रे गत्वा दक्षिण-पूर्व-एशिया-पर्यन्तं मानवजनसङ्ख्यायाः विस्तारस्य मार्गः प्रशस्तः कृतः। मङ्गलोरविश्वविद्यालयस्य प्रोफेसर मुस्ताक-महोदयः अवदत् यत् एतं निष्कर्षं प्राप्तुं वैज्ञानिकैः मुख्यभूमौ विभिन्नद्वीपेषु च निवसतां समुदायानां १९८ आधुनिक-प्राचीन-डी.एन.ए.-सीक्वेन्स-इत्येषां विश्लेषणं कृतम्। अस्मिन् लक्षद्वीपात् श्रीलङ्कातः च प्राप्तानि प्रतिदर्शनानि अपि सम्मिलितानि आसन्। विस्तृतानाम् आनुवंशिकदत्तांशानाम् आधारेण शोधकर्तारः 'R30' इत्यस्य वंशावल्याः पुनर्निर्माणेन सह अस्य एकस्याः नूतनायाः आधारभूतशाखायाः अभिज्ञानं कर्तुं सफलाः अभवन्, या मुख्यरूपेण दक्षिणभारते प्राप्ता अस्ति।

राजस्थानस्य कोटा-मण्डलस्य जे.के.-लोन-चिकित्सालये

प्रसूतानां मृत्योः क्रमः न विरमति



कोटा।राजस्थानस्य कोटा-मण्डलस्य जे.के.-लोन-चिकित्सालये प्रसूतानां मृत्योः क्रमः विरामं न गृह्णाति। गुरुवासरे रात्रौ उपचारकाले एका अपरा गर्भवती महिला मृता। उल्लेखनीयम् अस्ति यत् मध्यप्रदेशस्य श्योपुर-मण्डलचिकित्सालयात् सा महिला अतीव गम्भीरावस्थायां कोटा-चिकित्सालयं प्रति प्रेषिता (रेफर कृता) आसीत्। अत्र शुक्रवासरे रात्रौ दशवादने (१० वादने) सा प्राणान् अत्यजत्। अनेन सहैव विगतेषु पञ्चत्रिंशत् (३५) दिनेषु जे.के.-लोन-चिकित्सालये अष्टानां (८) रुग्णानां मृत्युः अभवत्, येषु सप्त (७) प्रसूताः सम्मिलिताः सन्ति।ध्यातव्यम् अस्ति यत् अस्मिन् वर्षे अद्यावधि कोटा-नगरस्य सर्वकारीयचिकित्सालयेषु प्रायः त्रिंशत् (३०) प्रसूतानां मृत्युः अभवत्। तथापि, प्रशासनस्य अभिलेखेषु केवलं त्रयोदश (१३) प्रसूतानाम् एव नामानि पञ्जीकृतानि सन्ति। अधिकाः मृत्यवः प्रसवोत्तरम् अत्यधिकरक्तस्रावस्य, 'मल्टी-ऑर्गन-डिस्फंक्शन-सिण्ड्रोम' (बहुल-अङ्ग-निष्क्रियता-लक्षणम्) इत्यस्य तथा च समये उपचारस्य अभावात् अभवन्।चिकित्सामन्त्री श्रीमान् गजेन्द्रसिंहखींवसरः अवदत् यत् औषधानां गुणवत्ता, शल्यक्रियाकक्षः (ऑपरेशन थिएटर), उपकरणेषु सङ्क्रमणम् तथा च उपचारे प्रमादः इत्यादीनां सर्वेषां पक्षाणां विषये अन्वेषणं क्रियमाणम् अस्ति।

भारतीय-क्रिकेट-दलस्य प्रमुखः भ्रमी-कन्दुकक्षेपकः युजवेन्द्रचहलः भाजपा-दलस्य राष्ट्रिय-ओ.बी.सी.-मोर्चायाः कार्यकारिणीसमितौ विशेषामन्त्रितसदस्यः नियुक्तः



नवदेहली। भारतीय-क्रिकेट-दलस्य प्रमुखः भ्रमी-कन्दुकक्षेपकः युजवेन्द्रचहलः भारतीयजनतापक्षस्य (भाजपा) राष्ट्रिय-अन्यपिछड़ावर्ग-मोर्चायाः (ओ.बी.सी. मोर्चा) कार्यकारिणीसमितौ विशेषामन्त्रितसदस्यः नियुक्तः अस्ति। भाजपा-दलेन शनिवासरे दलस्य अन्यपिछड़ावर्ग-मोर्चायाः राष्ट्रियपदाधिकारिणां नियुक्तेः घोषणा कृता। भाजपा-दलस्य राष्ट्रिय-अध्यक्षस्य श्रीनितिननवीनस्य निर्देशे कृतासु एतासु नियुक्तिषु सप्त (७) राष्ट्रियोपाध्यक्षाः, त्रयः (३) राष्ट्रियमहामन्त्रिणः तथा च सप्त (७) राष्ट्रियसचिवः सम्मिलिताः सन्ति। विभिन्नराज्येभ्यः मोर्चायाः सप्तत्रिंशत् (३७) राष्ट्रियकार्यकारिणीसदस्यानाम् अपि नियुक्तिः कृता अस्ति। एताः नियुक्तयः तत्कालप्रभावेन प्रवृत्ताः अभवन्।

क्रिकेट-क्रीडायां चहलस्य विशिष्टम् आधिपत्यम् १९९० तमे वर्षे जातः चहलः भारतीय-क्रिकेट-दले एकः कुशलः वाम-भ्रमी-कन्दुकक्षेपकः अस्ति, यः पूर्वम् एकदिवसीय-क्रिकेट-क्रीडायां देशस्य प्रतिनिधित्वं कृतवान् अस्ति। क्रिकेट-क्रीडाक्षेत्रे स्वकीयां विशिष्टाम् अभिज्ञानं निर्मातुं पूर्वं सः चतुरङ्गक्रीडकः (शतरञ्ज-खिलाड़ी) अपि आसीत्। तस्य नाम्नि टी-२० (T20) क्रिकेट-क्रीडायां चतुःशतं (४००) विकेट-ग्रहणं कर्तुः प्रथमस्य भारतीयकन्दुकक्षेपकस्य कीर्तिमानः अपि पञ्जीकृतः अस्ति।

काश्याः पुण्यधरणीतः राज्यपालायै श्रीमती-आनन्दीबेन-पटेल-महोदयायै जन्मदिवसस्य शुभकामनाः — कुलपतिः प्रो. बिहारीलालशर्मा



महामहिमायाः प्रेरणाप्रदं व्यक्तित्वं, शिक्षा-संस्कार-राष्ट्रसेवायाः प्रति समर्पणभावश्च अनुकरणीयः

हिमसंस्कृतवार्ताः - वाराणसी।

उत्तरप्रदेशस्य महामहिमायाः राज्यपालायाः तथा प्रदेशस्य सर्वेषां राज्यविश्वविद्यालयानां कुलाधिपत्याश्च आदरणीयायाः श्रीमती-आनन्दीबेन-पटेल-महोदयायाः जन्मदिवसस्य पुण्यावसरे सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणस्याः कुलपतिना प्रो. बिहारीलालशर्मणा तस्यै हार्दिकाः शुभकामनाः अनन्तमङ्गलकामनाश्च प्रेषिताः।कुलपतिः प्रो. बिहारीलालशर्मा स्वकीयशुभकामनासन्देशे अवदत् यत् महामहिमायाः राज्यपालायाः श्रीमती-आनन्दीबेन-पटेल-महोदयायाः प्रेरणाप्रदं व्यक्तित्वम्, दूरदर्शिनेतृत्वम्, अद्भुतः कर्मठतागुणः तथा शिक्षायाः, समाजस्य, राष्ट्रस्य च सर्वतोमुखविकासं प्रति अनन्यसमर्पणभावः अस्माकं सर्वेषाम् अक्षयप्रेरणास्रोतः वर्तते। प्रदेशस्य विश्वविद्यालयेषु शैक्षणिकगुणवत्तायाः, अनुसन्धानस्य, नैतिकमूल्यानाम्, भारतीयज्ञानपरम्परायाः, सामाजिकोत्तरदायित्वस्य च प्रोत्साहनदिशि तस्याः सततं मार्गदर्शनं उच्चशिक्षाजगतः कृते नूतनां दृष्टिं, दिशां, ऊर्जां च प्रददाति।

तेन कथितं यत् महामहिमायाः विशिष्टकार्यशैल्यां शिक्षा केवलं ज्ञानार्जनस्य माध्यमं न, अपितु संस्काराणां, संवेदनशीलतायाः, सामाजिकपरिवर्तनस्य, राष्ट्रनिर्माणस्य च सशक्तमाध्यमं भवेत् इति प्रतिबद्धता स्पष्टतया परिलक्ष्यते। समाजस्य वञ्चितानां दुर्बलवर्गाणां च कल्याणं प्रति तस्याः संवेदनशीलता तथा जनसेवां प्रति निष्ठा तस्याः व्यक्तित्वाय विशिष्टां गरिमां प्रददाति।कुलपतिना प्रो. शर्मणा उक्तं यत् महामहिमायाः सक्रियं, अनुशासितं, सेवाभावनायुक्तं च जीवनं कर्तव्यपरायणतायाः, कर्मनिष्ठायाः, लोकमङ्गलं प्रति समर्पणस्य च अनुपमा आदर्शमूर्तिः अस्ति। तस्याः मार्गदर्शनेन संरक्षणेन च उत्तरप्रदेशस्य विश्वविद्यालयेषु शिक्षा-संस्कार-भारतीयसंस्कृतेः-ज्ञानसाधनायाश्च विविधाः आयामाः निरन्तरं सुदृढाः भवन्ति। विशेषतः भारतीयज्ञानपरम्परायाः सनातनसांस्कृतिकमूल्यानां च संरक्षणे संवर्धने च तस्याः प्रेरणा उच्चशिक्षासंस्थानानां कृते अत्यन्तं महत्त्वपूर्णा वर्तते।अस्मिन् शुभावसरे काश्याः पुण्यधरणीतः भगवतः श्रीकाशीविश्वनाथस्य मातुः अन्नपूर्णायाश्च श्रीचरणयोः प्रार्थना अस्ति यत् ते महामहिमायै उत्तमस्वास्थ्यं, दीर्घायुः, अपरिमिताम् ऊर्जां, चिरस्थायिनीं प्रसन्नतां च प्रदद्युः। तस्याः स्नेहपूर्णं संरक्षणं प्रेरणाप्रदं मार्गदर्शनं च प्रदेशस्य सर्वेभ्यः विश्वविद्यालयेभ्यः निरन्तरं प्राप्यताम् तथा च तस्याः नेतृत्वे उत्तरप्रदेशस्य उच्चशिक्षाजगत् उत्कृष्टतायाः नवाचारस्य च नूतनानि प्रतिमानानि स्थापयतु।

कुलपतिः प्रो. शर्मा महामहिमायाः स्वस्थस्य, दीर्घस्य, यशस्विनश्च जीवनस्य मङ्गलकामनां कुर्वन् अवदत् यत् तस्याः जीवनं स्वास्थ्यस्य, सात्त्विकप्रसन्नतायाः, सक्रियतायाः, यशस्विनः लोकसेवायाश्च नवनवीनैः सोपानैः निरन्तरम् आलोकितं भवतु। तेन पुनः जन्मदिवसस्य पावनावसरे हृदयतः हार्दिकाः शुभकामनाः अशेषमङ्गलकामनाश्च प्रेषिताः।

एकलव्यपरिसरे त्रिदिवसीययक्षेत्रीययुवमहोत्सवे पूर्वोत्तरभारतस्य विविधराज्येभ्यः द्वादशसंस्थानानां प्रतिनिधयःसहभागितां कृतवन्तः

अगरतला, १९ नवम्बर। नवदेहलीस्थित-केन्द्रीयसंस्कृतविश्वविद्यालयस्य द्वादशसु घटकपरिसरेषु अन्यतमः पश्चिमत्रिपुरायाः लेम्बूचेरास्थितः एकलव्यपरिसरः षोडश-क्षेत्रीय-युव-महोत्सवस्य २०२६-२७ (पूर्वक्षेत्रम्-४) आयोजनं कृतवान्। त्रिदिवसीयः महोत्सवः १९ नवम्बरतः २१ नवम्बरपर्यन्तं परिसरस्य प्राङ्गणे आयोजितः । पूर्वोत्तरभारतस्य विविधराज्येभ्यः द्वादशसंस्थानानां प्रतिनिधयः अस्मिन् महोत्सवे सहभागितां कृतवन्तः। विश्वविद्यालयस्य माननीयकुलपतिः प्रो. श्रीनिवासवरखेडीमहोदयः महोत्सवस्य संरक्षकः तथा एकलव्यपरिसरस्य निदेशकः प्रो. गुरुचरणसिंहनेगीमहोदयः आयोजनस्य अध्यक्षः अभवत्। महोत्सवस्य उद्घाटनसमारोहः १९ नवम्बरदिनाङ्के प्रातः १० वादने सम्पन्नः। कार्यक्रमस्य शुभारम्भः मङ्गलदीपप्रज्वलनेन अभवत्। ततः राष्ट्रगीतस्य विश्वविद्यालयस्य कुलगीतस्य च प्रस्तुतीकरणम् अभवत्। डॉ. आशीषमिश्रः वैदिकमङ्गलाचरणं प्रस्तुतवान्। परिसरस्य छात्रैः पारम्परिकमङ्गलाचरणं स्वागतगीतं च प्रस्तुतम्। केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरस्य शिक्षाशास्त्रविभागस्य आचार्यः विभागाध्यक्षश्च प्रो. बुलुसु पद्ममित्रश्रीनिवासः स्वागतभाषणं प्रास्ताविकभाषणं च प्रस्तुतवान्। समारोहस्य अवसरः गणमान्यातिथीनां सम्माननस्य अवसरः अपि अभवत्।





उद्घाटनसमारोहे विशिष्टातिथिरूपेण मोहनपुरस्य उपमण्डलाधिकारी श्री शान्तनुविकाशदासः, होलीक्रॉसमहाविद्यालयस्य (अगरतला) प्राचार्यः डॉ. फादर बी. के. जॉन, सी.एस.सी. तथा च महात्मागान्धी-अन्ताराष्ट्रिय-हिन्दी-विश्वविद्यालयस्य (वर्धा) शिक्षासङ्कायस्य डॉ. योगेन्द्रबाबुः उपस्थिताः आसन्। केन्द्रीयसंस्कृतविश्वविद्यालयस्य नवदेहलीस्थमुख्यालयस्य प्रतिनिधिरूपेण उपनिदेशकः (शैक्षणिकः) डॉ. देवानन्दशुक्लः, सहायकप्राध्यापकः तथा परियोजनाधिकारी (सूचनासञ्चारप्रौद्योगिकी-प्रभारी) डॉ. विजयकुमारदाधीचः, समाजविज्ञानविभागस्य (राजनीतिशास्त्रम्) सहायकप्राध्यापकः डॉ. योगेन्द्रकुमारदीक्षितः च समारोहे उपस्थिताः आसन्। श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य (पुरी, ओडिशा) कुलपतिः प्रो. प्रभातकुमारमहापात्रः मुख्यातिथिरूपेण उपस्थितः भूत्वा मुख्यभाषणं प्रस्तुतवान्। समारोहस्य अध्यक्षताम् एकलव्यपरिसरस्य निदेशकः प्रो. गुरुचरणसिंहनेगी कृतवान् तथा च अध्यक्षीयभाषणं प्रस्तुतवान्। अयं त्रिदिवसीयः महोत्सवः छात्राणां शैक्षणिक-सांस्कृतिक-साहित्यिक-क्रीडासम्बद्धेषु विविधकार्यक्रमेषु सहभागितायाः अवसरं प्रदास्यति। छात्राः स्वप्रतिभां प्रदर्शयितुं, परस्परं संवादं स्थापयितुं, समूहभावनां विकसितुं, सांस्कृतिकविनिमयं कर्तुं तथा च स्वस्थस्पर्धायां भागं ग्रहीतुम् अवसरं प्राप्स्यन्ति। महोत्सवस्य समापनसमारोहः २१ नवम्बरदिनाङ्के अपराह्णे ४ वादने भविष्यति। समारोहस्य धन्यवादज्ञापनं केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरस्य आङ्ग्लविभागस्य सहायकप्राध्यापकः डॉ. सुमन-आचार्जी कृतवान्। उद्घाटनकार्यक्रमस्य मञ्चसञ्चालनं सहायकप्राध्यापकः डॉ. उमेशचन्द्रमिश्रः कृतवान्।

मुख्यमन्त्रिणा सुक्खुना ढगवार-दुग्ध-प्रसंस्करण-संयन्त्रस्य निरीक्षणं कृतम्, अधिकारिभ्यः निर्देशाः प्रदत्ताः;

सहस्रशः कृषकाः लाभान्विताः भविष्यन्ति



हिमसंस्कृतवार्ता - काङ्गड़ा।

मुख्यमन्त्री ठाकुरः सुखविन्दरसिंहसुक्खुः शनिवासरे काङ्गडामण्डलस्य ढगवार-स्थाने प्रायः त्रिशतकोटि-रूप्यकाणां व्ययेन निर्माणाधीनस्य दुग्ध-प्रसंस्करण-संयन्त्रस्य निरीक्षणं कृतवान्। तेन अधिकारिभ्यः निर्माणकार्यं त्वरितगत्या सम्पादयितुं तथा निर्धारितसमयसीमायामेव कार्यं पूर्णं कर्तुं निर्देशाः प्रदत्ताः।मुख्यमन्त्रिणा घोषितं यत् अस्य संयन्त्रस्य लोकार्पणं जनवरीमासे २०२७ तमे वर्षे करिष्यते। प्रतिदिनं लक्षपञ्चाशत्सहस्र-सेटक-दुग्धस्य प्रसंस्करणक्षमतायुक्तेन अस्मिन् अत्याधुनिकेन संयन्त्रेण काङ्गडा, ऊना, चम्बा तथा हमीरपुरमण्डलानां सहस्रशः दुग्धोत्पादक-कृषकाः लाभान्विताः भविष्यन्ति। मुख्यमन्त्री अवदत् यत् एषा परियोजना ग्रामीणार्थव्यवस्थायाः सुदृढीकरणे तथा कृषकाणां पशुपालकानां च आयवर्धने महत्त्वपूर्णां भूमिकां निर्वक्ष्यति। अस्मिन् संयन्त्रे मोजरेल्ला-चीज्, पनीर, दधि, घृतं तथा नवनीतम् इत्यादयः विविधाः दुग्धजन्यपदार्थाः निर्मीयन्ते। एते उत्पादाः 'हिम्' इति ब्राण्डनाम्ना विपण्याम् अवतारयिष्यन्ते। परियोजनायाः परीक्षणकार्यं प्रचलति। संयन्त्रस्य अङ्कीयकरणाय सर्वकारः एककोटि-पञ्चविंशतिलक्ष-रूप्यकाणि तथा सञ्चालनार्थं नवविंशतिः कोटि-एकोनपञ्चाशल्लक्ष-रूप्यकाणि कार्यशीलपूँजीरूपेण प्रदास्यति। मुख्यमन्त्रिणा दुग्ध-सहकारी-समितीनां पञ्जीकरणप्रक्रियां त्वरितां कर्तुं तथा अधिकाधिकान् कृषकान् ताभिः सह संयोजयितुं निर्देशाः अपि प्रदत्ताः।

त्रीणि संस्थापनानि स्थापितवन्तः, विंशतिः कम्पनीनां कृते स्थानम्;

मुख्यमन्त्रिणा गग्गलस्य समीपे निर्मितस्य सूचनाप्रौद्योगिकी-उद्यानस्य उद्घाटनं कृतम्



हिमसंस्कृतवार्ता - काङ्गड़ा।

हिमाचलप्रदेशस्य मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना गग्गलस्य समीपे चैतडू-स्थाने निर्मितस्य सूचनाप्रौद्योगिकी-उद्यानस्य लोकार्पणं कृतम्। मुख्यमन्त्रिणा सह तस्य सूचनाप्रौद्योगिकी-परामर्शदाता गोकुलबुटेलः, राज्यसभासांसदः अनुरागशर्मा, डिजिटल-प्रौद्योगिकी-शासन-विभागस्य निदेशकः अभिषेकवर्मा, बूल-फेडरेशन-सङ्घटनस्य अध्यक्षः मनोजकुमारः, अल्पसङ्ख्यक-आयोगस्य अध्यक्षः सादिकखानः, काङ्गसेनेता नवनीतशर्मा तथा अन्ये काङ्गसेकार्यकर्तारः अपि उपस्थिताः आसन्।

डिजिटल-प्रौद्योगिकी-शासन-विभागस्य निदेशकः अभिषेकवर्मा अवदत् यत् अयं सूचनाप्रौद्योगिकी-उद्यान-परिसरः पञ्चत्रिंशत्सहस्र-वर्गफुट्-क्षेत्रफले निर्मितः अस्ति। सम्प्रति अत्र त्रिभिः कम्पनीभिः स्वकीयानि संस्थापनान स्थापितानि सन्ति। तेन सूचितं यत् अस्मिन् परिसरे अष्टादशतः विंशतिपर्यन्तं कम्पनीभिः स्वकीयानि संस्थापनानि स्थापयितुं शक्यन्ते।

अटल् बिहारी वाजपेयी विश्वविद्यालयेन पीएच्.डी. (विद्यावारिधि) उपाधिसम्बद्धा अधिसूचना प्रसारिता

मुंगेली। अटल् बिहारी वाजपेयी विश्वविद्यालयेन, बिलासपुरेण (छत्तीसगढ़ः) पीएच्.डी. (विद्यावारिधि) उपाधिसम्बद्धायाः अधिसूचनायाः प्रकाशनेन उच्चशिक्षायाः अनुसन्धानक्षेत्रे महत्त्वपूर्णः अवसरः समुपलब्धः अभवत्।अस्मिन् शुभावसरे मुंगेलीनगरस्थितस्य डॉ. ज्वालाप्रसादमिश्र-शासकीयविज्ञानमहाविद्यालयस्य डॉ. सुरेशकुमार-भारतीमहोदयाय विद्यावारिधि (पीएच्.डी.) उपाधिः प्राप्ता इति ज्ञात्वा हर्षः अनुभूयते।विश्वविद्यालयेन प्रकाशितेयम् पीएच्.डी. अधिसूचना शोधार्थिनां कृते उच्चस्तरीयशैक्षणिकानुसन्धानस्य च नूतनान् अवसरान् उद्घाटयति। अनेन छात्रेषु युवजनेषु च अनुसन्धानकार्यं प्रति रुचिः वर्धिष्यते तथा ज्ञानविज्ञानस्य विविधेषु क्षेत्रेषु नवीनानुसन्धान-कार्याणि प्रोत्साहनं प्राप्स्यन्ति।अस्मिन् शुभावसरे शासकीयोत्तरमाध्यमिकविद्यालयस्य, फास्टरपुरस्य, मुंगेलीजनपदस्य संस्कृतव्याख्याता डॉ. रामबाबूमिश्रमहोदयः हार्दिकाः शुभकामनाः प्रेषयन् अवदत् यत् अनुसन्धानमेव शिक्षायाः आत्मा अस्ति। विश्वविद्यालयेषु अनुसन्धानस्य समुचितव्यवस्थया ज्ञानस्य विस्तारः भवति तथा समाजस्य राष्ट्रस्य च विकासाय नवीनाः सम्भावनाः उद्घाट्यन्ते।तेन अनुसन्धानकार्ये रुचिं धारयद्भ्यः सर्वेभ्यः अभ्यर्थिभ्यः उज्ज्वलभविष्याय सफलायै च अनुसन्धानयात्रायै मङ्गलकामनाः कृताः।



डॉ. रामबाबूमिश्रः
संस्कृतव्याख्याता
शासकीयः उच्चतरमाध्यमिक विद्यालयः, फास्टरपुरम्
मुंगेलीजनपदम्, छत्तीसगढ़ः।

शीतकालीनसत्रे सर्वेषु विषयेषु सर्वकारः विफलः, भारतीयसेनायाः विषये टिप्पणीं कृतवन्तं मन्त्रिणं पदात् निष्कासयेत् — जयरामठाकुरः



हिमसंस्कृतवार्ताः - धर्मशाला।

हिमाचलप्रदेशविधानसभायाः शीतकालीनसत्रस्य अन्तिमदिने विपक्षनेता जयरामठाकुरः प्रदेशसर्वकारं प्रति तीव्रम् आक्षेपं कृतवान्। तेन कथितं यत् सम्पूर्णं शीतकालीनसत्रं सर्वकारस्य विफलतां प्रकाशयति। विपक्षेण भ्रष्टाचारस्य, 'हिमाचल ऑन सेल' इति विषयस्य, भारतीयसेनया सम्बन्धितानां गम्भीरविषयाणां च उत्थापनं कृतम्, किन्तु सर्वकारः कस्मिन्नपि विषये सन्तोषजनकं प्रत्युत्तरं दातुं न समर्थः अभवत्।जयरामठाकुरः भारतीयसेनां प्रति मन्त्रिणः कथितां टिप्पणीं दुर्भाग्यपूर्णां वर्णयन् सम्बन्धितमन्त्रिणं मन्त्रिमण्डलात् निष्कासयितुं तथा मुख्यमन्त्रिणा मन्त्रिणा च सार्वजनिकरूपेण क्षमायाचनां कर्तुं आग्रहं कृतवान्। तेन उक्तं यत् अस्याः टिप्पण्याः सैनिकेषु, अधिकारिषु, पूर्वसैनिकेषु च तीव्रः रोषः वर्तते। प्रदेशस्य विभिन्नेषु जनपदेषु एव न, अपितु सम्पूर्णे देशे पूर्वसैनिकाः विरोधं प्रकटयन्ति। तेन आरोपितं यत् मुख्यमन्त्री सम्बन्धितमन्त्रिणः संरक्षणं कुर्वन् अस्ति। एतादृशे संवेदनशीले विषये सर्वकारेण कठोरं पक्षम् अवलम्ब्य मन्त्रिणं पदात् निष्कासयितुं तथा तस्य विरुद्धं प्रकरणं पञ्जीकर्तुं च उचितम्।विपक्षनेता अवदत् यत् सत्रकाले विपक्षेण 'हिमाचल ऑन सेल' इति विषयस्य तथा भ्रष्टाचारस्य प्रकरणेषु सर्वकारात् स्पष्टीकरणं याचितम्, किन्तु नियम-६७ इत्यस्य अन्तर्गतं सम्पन्नायाम् अपि चर्चायां मुख्यमन्त्री वस्तुस्थितिं स्पष्टयितुं न समर्थः अभवत्। भूमिसम्बद्धेषु प्रकरणेषु अपि सर्वकारेण किमपि सन्तोषजनकं प्रत्युत्तरं न दत्तम्। तेन कथितं यत् गतचतुर्षु वर्षेषु काङ्गसदलं सत्तायाम् अस्ति, अतः स्वस्य कार्यकाले स्वीकृतानां निर्णयानां दायित्वं तेन स्वीकरणीयम्। मुख्यमन्त्रिणः तस्य वक्तव्यस्य प्रत्युत्तरं ददन् जयरामठाकुरः अवदत् यत् निर्वाचनपराजयानन्तरं मुख्यमन्त्री स्वयमेव प्रभावस्य स्थितौ वर्तते। सः पञ्चायतनिर्वाचनसम्बद्धानाम् उत्पद्यमानानां प्रश्नानाम् उत्तरं दातुं स्थाने विपक्षस्योपरि आरोपान् आरोपयति। तेन पुनरपि प्रतिपादितं यत् शीतकालीनसत्रे सर्वकारः प्रत्येकस्मिन् मोर्चे प्रत्युत्तरं दातुं विफलः अभवत्।

सहारा-योजनां प्रति सदने तीव्रः सङ्घर्षः, लाभार्थिनां सत्यापनस्य कारणं स्पष्टीकृतवान् मुख्यमन्त्री सुक्खुः



हिमसंस्कृतवार्ता- धर्मशाला।

हिमाचलप्रदेशविधानसभायाः शीतकालीनसत्रस्य प्रश्नकालावसरे विधायकस्य रणधीरशर्मणः सहारा-योजनामधिकृत्य पृष्टस्य प्रश्नस्य विषये सत्तापक्ष-विपक्षयोः मध्ये तीव्रा वाक्युद्धस्थितिः दृष्टा। विपक्षस्य आरोपान् प्रत्युत्तरयन् मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः सदने स्पष्टीकृतवान् यत् सर्वकारेण एषा जनकल्याणकारिणी योजना न समापिता, अपितु सर्वकारीयधनस्य दुरुपयोगं निवारयितुं लाभार्थिनां सत्यापनप्रक्रिया प्रारब्धा अस्ति।मुख्यमन्त्री आश्वासनं दत्तवान् यत् विधायकाः स्वस्वनिर्वाचनक्षेत्रेषु ये पात्राः लाभार्थिनः सन्ति, तेषां नामानि दिसम्बरमासस्य २० दिनाङ्कपर्यन्तं सर्वकाराय अथवा सामाजिकन्याय-सशक्तीकरणविभागाय प्रेषयेयुः, तर्हि तेभ्यः पेन्शनसुविधां प्रदातुं प्रयासः करिष्यते। तेन स्पष्टमुक्तं यत् सर्वकारस्य उद्देशः कस्यापि आवश्यकताग्रस्तस्य अधिकारस्य हरणं नास्ति, किन्तु अपात्रजनाः केनापि प्रकारेण योजनायाः लाभं न प्राप्नुयुः।सदने योजनायाः पुनरीक्षणस्य विवरणं प्रस्तुतयन् मुख्यमन्त्री पूर्वभाजपासर्वकारस्य कार्यकाले सम्पन्नस्य पञ्जीकरणस्य विषये प्रश्नान् उत्थापितवान्। तेन कथितं यत् पूर्वसर्वकारस्य कार्यकाले प्रायः ८१,८२० जनानां पञ्जीकरणं कृतमासीत्, किन्तु पुनरीक्षणकाले अनेकाः आश्चर्यजनकाः तथ्याः प्रकाशं गताः। केवलं हमीरपुरजनपदस्य भोरञ्जक्षेत्रे ३,४८८ तथा नादौनक्षेत्रे २,८६४ जनाः पञ्जीकृताः आसन्, यत् अन्यजनपदानामपेक्षया अत्यधिकम् आसीत्।अतः योजनायां पारदर्शितां स्थापयितुं तां स्वास्थ्यविभागात् स्थानान्तर्यं सामाजिकन्याय-सशक्तीकरणविभागस्य अधीनं स्थापितम् अस्ति। तथापि चिकित्सामण्डलस्य व्यवस्था पूर्ववत् एव स्थास्यति। सम्प्रति आङ्गनवाडिकार्यकर्तृभिः गृहं गृहं गत्वा लाभार्थिनां सत्यापनं क्रियते। अस्याः प्रक्रियायाः अन्तर्गतं विभागं प्राप्तेषु प्रायः ९,५७२ प्रकरणेषु सत्यापनानन्तरं ४,५०० पात्रलाभार्थिनां सूची अग्रे प्रेषिता अस्ति।अस्मात् पूर्वं विपक्षनेता जयरामठाकुरः सर्वकारं लक्ष्यीकृत्य आरोपितवान् यत् विगतेषु पञ्चसु षट्सु वा मासेषु गम्भीररोगैः पीडितेभ्यः शय्यागतेभ्यः रोगिभ्यः पेन्शनं न प्राप्यते। तेन स्वस्य निर्वाचनक्षेत्रस्य एकं संवेदनशीलं प्रकरणमपि सदने उत्थापितम्। तेन कथितं यत् मेरुरज्जोः गम्भीरक्षतिग्रस्तस्य एकस्य जीवतः युवकस्य पेन्शन केवलम् एतस्मात् कारणात् स्थगिता यत् सर्वकारीयाभिलेखे सः मृतः घोषितः आसीत्।जयरामठाकुरेण योजनायाः अन्तर्गतं राजनैतिककार्यकर्तृभ्यः लाभं प्रदातुं सम्बन्धिनीं मुख्यमन्त्रिणः टिप्पणीमपि प्रति तीव्रः आक्षेपः कृतः तथा क्षमायाचनायाः आग्रहः कृतः। अस्य प्रत्युत्तरं ददन् मुख्यमन्त्रिणा आश्वासितं यत् यदि कश्चित् पात्रः व्यक्ति मानवीयप्रमादवशात् मृतः घोषितः अथवा तस्य लाभः स्थगितः अस्ति, तर्हि तस्य प्रकरणस्य तत्कालं परीक्षणं कारयिष्यते तथा च प्रत्येकस्य वास्तविकाधिकारिणः अधिकारस्य रक्षणं सुनिश्चितं करिष्यते।अस्मिन् सम्पूर्णे विषये मुख्यमन्त्रिणः, उपमुख्यमन्त्रिणः, विपक्षनेतुः च मध्ये सदने बहुकालपर्यन्तं तीव्रा वाक्पटुता तथा परस्परं वादविवादः अभवत्।अन्यतः विधायकः रणधीरशर्मा प्रश्नम् उत्थापितवान् यत् सर्वकारः सहारा-योजनां समापयितुं प्रयासं करोति। विपक्षः एतत् कदापि न सहिष्यते। तेन कथितं यत् योजनायाः विभागान्तरणानन्तरमपि सर्वकारस्य अभिप्रायं प्रति अनेकाः शङ्काः उत्पद्यन्ते।

अक्वान्-चक्रवात-कारणात् आभासीयपटले वाग्वर्धिनीपरिषदः अभ्याससत्रम्



हिमसंस्कृतवार्ताः- श्रीजगन्नाथ- संस्कृत-विश्वविद्यालयः, पुरी. अक्वान् इति नामकेन चक्रवातेन कारणेन सक्षमाधिकारिणाम् अनुमत्या छात्राणां कक्षागमनं निवारितम्। तस्मात् वाग्वर्धिनीपरिषदः अभ्याससत्रस्य आयोजनं गूगलमीट इति आभासीयपटले विहितम्। सत्रेऽस्मिन् विश्वविद्यालयस्य विभिन्नेभ्यः विभागेभ्यः षड्विंशतिः (26) छात्राः सहभागं कृतवन्तः।

॥सत्रस्य आरम्भः- गीतेन॥

सत्रस्यास्य आरम्भः -
"सुरससुबोधा विश्वमनोज्ञा ..... न च कठिना"
इत्यनेन गीतेन अभवत्। गीतं गीतवती न्यायविभागस्य आचार्या डॉ. रश्मिताजेनामहाशया।

॥व्याकरणाभ्यासः॥

ततः च व्याकरणांशानाम् अभ्यासः परिषदः संयोजिकया *डॉ. प्रज्ञाशर्ममहोदयया* कारितः। छात्रैः शब्दरूपाणां, धातुरूपाणां, वाक्यरचनायाः च अभ्यासः उत्साहेन कृतः।

॥समापनम्॥

कल्याणमन्त्रेण सभा इयं सुप्रतिष्ठिता, समाप्ता च। चक्रवातपरिस्थितावपि आभासीयमाध्यमेन छात्राणां स्वाध्यायः, वाग्वर्धनं, शास्त्राभ्यासः च निरन्तरं प्रचलति इति जगन्नाथकृपया अयं कार्यक्रमः सप्रमाणं साधितः अभूत्।

नवाचाराधारितशिक्षणेन उत्कृष्ट- शैक्षिकोपलब्धीनां च आदर्शरूपा अभवत् जूली मलिक



बुलन्दशहरे सहायकाध्यापिका जूली मलिक् इत्यस्याः शैक्षिकनवाचाराः प्रशंसनीयाः। राज्यस्तरीयेन 'निपुणसम्मानेन', राज्याध्यापक- पुरस्कारेण च सम्मानिता।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, उत्तरप्रदेशस्य बुलन्दशहरजनपदस्य स्यानास्थिते संविलियन- उच्चप्राथमिकविद्यालये कार्यरता सहायकाध्यापिका जूली मलिकवर्या नवाचारपूर्णशिक्षणपद्धतीनां माध्यमेन विद्यार्थिनां सर्वाङ्गीणविकासे उल्लेखनीयम् योगदानं प्रददाति। शैक्षिकसत्रे २०२५-२६ तस्याः विद्यालये १३०८ विद्यार्थिनः नामाङ्किताः सन्ति। तेषु ६६२ बालिकाः तथा ६४६ बालकाः सन्ति। सौरमण्डलं, वायुमण्डलस्य स्तराः, मृत्तिकायाः संरचना, प्रदूषणस्य प्रकाराः तथा व्याकरणसम्बद्धाः अवधारणाः इत्यादीन् विषयान् आधारीकृत्य दश शैक्षिकनवाचारान् प्रयुज्य तया शिक्षणप्रक्रिया रोचिका प्रभावपूर्णा च कृता। क्रियाकलापाधारितशिक्षणस्य उत्तमकक्षाप्रबन्धनस्य च माध्यमेन विद्यार्थिनाम् अधिगमस्तरे गुणात्मिका वृद्धिः अभवत्। नियमितकक्षाक्रियाकलापैः अभिभावकैः सह संवादेन च विद्यार्थिनाम् उपस्थितिः विद्यालये निरन्तरं स्थितिश्च सुदृढीकृता। अपि च, त्रिपञ्चाशत्तमे मण्डलस्तरीये बालवैज्ञानिकप्रदर्शने विद्यार्थिनां सहभागितां सुनिश्चित्य तेषां वैज्ञानिकचिन्तनशक्तेः प्रोत्साहनं कृतम्। शिक्षाक्षेत्रे उत्कृष्टयोगदानाय तस्यै माननीयमुख्यमन्त्रिणा राज्यस्तरीयः 'निपुणसम्मानः' प्रदत्तः। तस्याः प्रशंसनीयैः शैक्षिककार्यैः प्रसन्नः विभागः वर्षे २०२५ तमे राज्याध्यापकपुरस्कारेण अपि तां सम्मानितवान्।

उत्तरप्रदेशस्य आधारभूतशिक्षाविभागः नवाचारस्य, समर्पणस्य तथा गुणवत्तापूर्णशिक्षणस्य माध्यमेन शिक्षाक्षेत्रे उत्कृष्टं योगदानं कुर्वतः शिक्षकान् सम्मानयन् निरन्तरं प्रोत्साहयति।

भारतभार्यां सप्ताहव्यापिमेलायाः शुभारम्भः,
जिलाधिकारी गौरवसिंहसोगरवालेन कृतम् उद्घाटनम्



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्। जनपदस्य ऐतिहासिके पौराणिक- महत्त्वसम्पन्ने च भारतभार्यां स्थिते प्रसिद्धे तीर्थस्थले सप्ताहव्यापिनः मेलापकस्य शुभारम्भः जिलाधिकारी गौरवसिंहसोगरवालमहोदयेन फीता- कर्तनेन कृतः। उद्घाटनसमारोहे भक्तिसङ्गीतस्य, भजन-कीर्तनस्य च विविधाः धार्मिकाः कार्यक्रमाः समायोजिताः। स्थानीयैः कलाकारैः मनोहारिण्यः प्रस्तुतयः प्रदर्शिताः, याभिः उपस्थितः जनसमूहः भावविभोरः अभवत्। कार्यक्रमस्य कुशलं सञ्चालनं राजस्वनिरीक्षकः रमेशचन्द्रश्रीवास्तवः कृतवान्। अस्मिन्नवसरे डुमरियागञ्जस्य उपजिलाधिकारी विवेकानन्दमिश्रः, भारतभारिनगरपञ्चायतस्य अध्यक्षः चन्द्रप्रकाशचौधरी, बढनीचाफा-नगरपञ्चायतस्य अध्यक्षः धर्मराजवर्मा, अधिशासी अधिकारी राजनगुप्तः, डुमरियागञ्जस्य तहसीलदारः, वरिष्ठः अधिवक्ता रमेशपाण्डेयः च सहिताः बहवः गणमान्याः नागरिकाः उपस्थिताः आसन्। माध्यमप्रतिनिधिभिः सह सम्भाषमाणः जिलाधिकारी गौरवसिंहसोगरवालः अवदत् यत् अस्मिन् मेले बहुसङ्ख्याकाः श्रद्धालवः पर्यटकाः च समागच्छन्ति। अतः सः मेलायाम् आगच्छद्भ्यः सर्वेभ्यः स्वगणनां कर्तुं मतदातृसूच्यां च स्वनाम समावेशयितुं विशेषम् आग्रहं कृतवान्। सः अग्रे अवदत् यत् मेलायाम् आगच्छतां श्रद्धालूनां पर्यटकानां च सुरक्षायै प्रशासनपक्षतः समुचिताः सुदृढाः च व्यवस्थाः सुनिश्चिताः सन्ति। धार्मिकश्रद्धायाः, सांस्कृतिकपरम्परायाः, लोककलायाश्च सङ्गमेन भारतभार्याः सप्ताहव्यापी मेला जनपदस्य धार्मिकसांस्कृतिकवैभवं समुज्ज्वलयति।

युवसंसदस्पर्धायां मुस्कानपाण्डेयायाः प्रथमस्थानं, जनपदस्य गौरवं वर्धितम्



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्। जनपदस्य माधवप्रसादत्रिपाठी-वैद्यकीयमहाविद्यालयस्य सभागारे आयोजितायां जनपदस्तरीयायां युवसंसद्-प्रतियोगितायां युवभिः 'नशामुक्ताः युवानः– विकसितभारतं च' इति महत्त्वपूर्णविषये स्वकीयाः ओजस्विनः विचाराः, बहुमूल्याः सुझावाः च प्रस्तुताः।अस्मिन् गरिमामये कार्यक्रमे जनपदस्य प्रतिभाशालिनी कन्या मुस्कानपाण्डेया प्रभावशालिना वक्तृत्वेन, युक्तियुक्तैः विचारैः च सर्वान् प्रभावित्य प्रथमस्थानं प्राप्तवती। तस्याः असाधारणेन सफलतया परिवारेण सह सम्पूर्णस्य क्षेत्रस्य गौरवं वर्धितम्। अस्याः गौरवपूर्णोपलब्धेः कृते मुस्कानपाण्डेयायै हार्दिक्यः शुभकामनाः, उज्ज्वलभविष्याय च अनन्ताः शुभाशीर्वादाः। सा एवम् एव निरन्तरम् उन्नतिपथे अग्रे सरन्ती समाजस्य कृते प्रेरणास्रोतः भवतु।

महामहिमराज्यपालमहोदयायाः जन्मदिवसोपलक्ष्ये
श्रवणबाधितविद्यार्थिभिः स्वच्छताभियानस्य सञ्चालनम्



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ। डॉ. शकुन्तला मिश्रा राष्ट्रिय- पुनर्वास-विश्वविद्यालयस्य श्रवणबाधितार्थविभागस्य प्रशिक्षुविद्यार्थिभिः उत्तरप्रदेशस्य महामहिमायाः राज्यपालायाः आनन्दीबेन पटेलमहोदयायाः जन्मदिवसस्य शुभावसरे लखनऊस्थे मोहनमार्गे स्थिते राजकीयसाङ्केतिकविद्यालये स्वच्छताभियानं सञ्चालितम्। अस्मिन् अभियाने प्रशिक्षुविद्यार्थिभिः विद्यालयपरिसरस्य स्वच्छता सम्पादिता। तैः श्रवणबाधितेभ्यः बालकेभ्यः व्यक्तिगतस्वच्छतायाः, विद्यालयपरिसरस्य स्वच्छतायाः, पर्यावरणस्य च संरक्षणस्य महत्त्वं बोधितम्। प्रशिक्षुभिः साङ्केतिकभाषायाः माध्यमेन बालकेभ्यः स्वच्छतायाः महत्त्वं सम्यक् अवगतं कारितं दैनिकजीवने च स्वच्छतायाः अभ्यासं कर्तुं प्रेरणा प्रदत्ता। अस्मिन् अवसरे उत्तरप्रदेशस्य दिव्याङ्गजन-सशक्तीकरणविभागस्य उपनिदेशकः डॉ. अमित रायः, राजकीयसाङ्केतिकविद्यालयस्य प्रधानाचार्यः हरिशङ्करवर्यः, श्रवणबाधितार्थविभागस्य अतिथिव्याख्याता डॉ. कौशलेन्द्रः अपि उपस्थिताः आसन्। अतिथिभिः प्रशिक्षुविद्यार्थिनां प्रयासस्य प्रशंसा कृता तथा च बालकेभ्यः सर्वदा स्वच्छतायां जागरूकाः भवितुं सन्देशः प्रदत्तः। अभियानस्य अन्ते सर्वैः विद्यालयपरिसरं स्वच्छं स्थापयितुं सामूहिकः सङ्कल्पः कृतः।

सशक्ताः युवानः– समृद्धः प्रदेशः आत्मनिर्भरः नवोत्तरप्रदेशः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः। उत्तर प्रदेशस्य मुख्यमन्त्रिणः योगी आदित्यनाथस्य कुशलनेतृत्वे नवोत्तरप्रदेशः युवानः केवलं रोजगारान्वेषकान् न अपि तु रोजगारप्रदातॄन् (उद्यमिनः) निर्मातुं दिशि तीव्रगतया अग्रे सरति। प्रदेशे पञ्चविंशतिसहस्राधिकाः (२५,०००+) नवोद्यमाः (स्टार्टअप) स्थापिताः सन्ति। सहस्रकोटिरूप्यकाणां (१,००० कोटि) निवेशकोषः तथा मुख्यमन्त्रिणः युवा-उद्यमी-विकासाभियानस्य अन्तर्गतं पञ्चलक्षरूप्यकाणि (५,००,०००) यावत् प्रत्याभूतिमुक्तम्, ब्याजमुक्तं च ऋणं युवानां स्वप्नानां साकारतायै संबलं प्रददाति, तेषां सङ्कल्पं च शक्तिमन्तं करोति। एवं प्रदेशसर्वकारस्य प्रयासैः युवानः आत्मनिर्भरत्वस्य दिशि प्रेरिताः भवन्ति तथा नवोत्तरप्रदेशस्य समृद्धौ महत्त्वपूर्णं योगदानं दातुं समर्थाः भवन्ति।

पाणिनीयव्याकरणस्य भारतीयदर्शनस्य कृत्रिमबुद्धिमत्तायाश्च समन्वयेन संस्कृतमनुसन्धानं प्राप्स्यते नूतनान् दिशः- डॉ. देवेन्द्रसिंहराजपूतः



हिमसंस्कृतवार्ताः- डॉ. राकेश कुमारः, सिरसामण्डलस्य एकोनविंशतिदिनाङ्के (१९ नवम्बर २०२६) चौधरीदेवीलालविश्वविद्यालयस्य संस्कृतविभागेन सप्तदशाष्टादशदिनाङ्कयोः 'संस्कृतभाषायां अनुसन्धाने च संगणकीय अनुप्रयोगः' इति विषये द्विदिवसीयस्य अन्तर्जालिककार्यशालायाः सफलमायोजनं कृतम्। कार्यशालायामस्यां देशस्य विभिन्नक्षेत्रेभ्यः शततोऽधिकाः शिक्षकाः शोधच्छात्राः विद्यार्थिनश्च सहभागितामकुर्वन्। अस्यामुख्यमुद्देश्यं संस्कृतभाषाम् आधुनिकतान्त्रिकविकासस्य संगणकीय- भाषाविज्ञानस्य कृत्रिमबुद्धिमत्तायाश्च (AI) साकं संयोज्यानुसन्धानस्य नूतनाः सम्भावनाः प्रति परिचाययितुमासीत्। कार्यशालायां हरियाणा-केन्द्रीय- विश्वविद्यालयस्य महेन्द्रगढ़स्य सहायकप्राध्यापकः डॉ देवेन्द्रसिंहराजपूतः मुख्यवक्ता आसीत्। सः पाणिनीयव्याकरणस्य आधुनिकगणकविज्ञानस्य चान्तर्सम्बन्धान् स्पष्टयन् न्यगादीत् यत् महर्षिपाणिनेरष्टाध्याय्याः सूत्रात्मिका नियमबद्धा तार्किकसंरचना च गणक- प्रोग्रामिंग-भाषाप्रसंस्करणस्य कृते अतीवोपयुक्ता वर्तते। सः 'अकः सवर्णे दीर्घः' इत्यस्य सूत्रस्योदाहरणं प्रदाय अवबोधितवान् यत् संस्कृतस्य व्याकरणिक-नियमान् गणकाधारित- सशर्तरूपांतरण-प्रणालीरूपेण विकसितुं शक्यते। सः संस्कृतस्य तान्त्रिकविकासाय वाॅयस-टाइपिङ्ग, डिजिटल-पुस्तकालयानाम्, ई-पाठनिर्माणस्य, सन्धि-समास- कारकविश्लेषणसम्बद्धानां सॉफ्टवेयर-इत्यादीनां निर्माणस्यावश्यकतायामपि बलं प्रदत्तवान्। कार्यशालाया द्वितीये दिवसे डॉ. राजपूतमहोदयः संस्कृतभाषाया विशिष्टसंरचनायाः, सन्धि- समास- मुक्तशब्दक्रम- समृद्धशब्दनिर्माण-क्षमतायाश्च कारणात् संगणकीयविश्लेषण-स्यावश्यकताया उपरि प्रकाशं पातितवान्। सः भारतीयदर्शनस्य कृत्रिमबुद्धिमत्तायाश्च समन्वयस्य सम्भावना रेखाङ्कयन् न्यायवैशेषिक- नव्यन्याय-मीमांसासिद्धान्तानाम् आधुनिकभाषा-प्रौद्योगिक्यामुपोगितां न्यवेदयत्। सः प्रोवाच यत् भारतीयज्ञानपरम्परायां विद्यमानाः तार्किक-विश्लेषणात्मक- पद्धतयोऽधुनिक-कृत्रिमबुद्धिमत्ताया विकासे महत्त्वपूर्णां योगदानं दातुं प्रभवन्ति। सः भारतस्य दुर्लभानां पाण्डुलिपिकानां संरक्षणस्योपरि विशेषं बलं दत्त्वा प्रावोचत् यत् आधुनिकतन्त्रज्ञानानां माध्यमेन प्राचीनग्रन्थानां डिजिटलस्वरूपेण सुरक्षितुं शक्यते। एतदर्थमुच्चगुणवत्तायुक्ताः डिजिटलस्कैन, आष्टिकल- कैरेक्टर- रिकग्निशन, यूनिकोड, टी.ई.आई. सदृशानां तन्त्रज्ञानानाम् उपोगिताऽनिवार्या वर्तते। तथैव बहुआयामी-अन्वेषणप्रणाल्या उपयोगिताम् विशदयन् सः प्रावोचत् यत् कृत्रिमबुद्धिमत्ताधारिततन्त्रज्ञानैः संस्कृतग्रन्थेषु कस्मिन्नपि विषये शब्दे वा सम्बद्धान् श्लोकान् टीकाः दार्शनिकसदर्भान् च एकदैवान्वेषयितुं शक्यते।

कार्यशालायाः शुभारम्भः संस्कृतविभागस्य सहायकप्राध्यापकेन डा रुद्रप्रसादत्रिपाठिमहोदयेन स्वस्तिवाचनेन शान्तिपाठे च अभवत्। मुख्यवक्तुरस्वागतसम्बोधनं विभागस्य सहायकप्राध्यापकः डॉ. मोहनलालः प्रस्तुतवान्, कार्यक्रमस्य संचालनं च विभागस्य शोधछात्रा प्रमिला कृतवती।कार्यशालाया आयोजनं संस्कृतविभागस्य कार्यकारीविभागाध्यक्षस्य कार्यक्रमसंयोजकस्य च डॉ. राकेशकुमारस्य संयोजने सम्पन्नम्। आयोजनसंयोजनसमित्यां डा मोहनलालः, श्रीमती कोमलः, सुरेन्द्रश्च विशेषसहयोगं प्रदत्तवन्तः। एतैः सर्वैः कार्यक्रमस्य अकादमिक- व्यवस्थागत- गतिविधीषु सक्रिया भूमिका निर्हिता। शोधछात्रा प्रमिलाऽपि कार्यक्रमस्य संचालने समन्वये च महत्त्वपूर्णां योगदानं कृतवती। विभागस्य समस्तशिक्षिकाणां शोधच्छात्राणां च सामूहिकप्रयासेभ्यः कार्यशाला सफलतापूर्वं सम्पन्ना। समापनवसरे विभागस्य सहायकप्राध्यापकः डॉ. सुरेन्द्रः धन्यवादप्रस्तावं प्रस्तुतवान् मुख्यवक्तृकृते, विश्वविद्यालयप्रशासनाय, विभागाध्यक्षाय, आयोजनसंयोजनसमित्यै, सर्वेभ्यश्च सहभागिभ्यः आभारं प्रकटितवान्।



सम्पूर्णसमाधानदिवसः- जनसमस्यानां गुणवत्तापूर्णं समयबद्धं च निराकरणं कुर्वन्तु अधिकारिणः- जिलाधिकारी

हिमसंस्कृतवार्ताः- वृजेशकुमार रूपाण्डेयः, लखीमपुरखीरी। जनसामान्यस्य समस्यानां शीघ्रं निराकरणाय शनिवासरे धौरहरातहसीले आयोजिते सम्पूर्णसमाधानदिवसे जिलाधिकारी अञ्जनीकुमार सिंहः, मुख्यविकासाधिकारी योगानन्दपाण्डेयः तथा मुख्यचिकित्साधिकारी डॉ. सन्तोषगुप्तः उपस्थितानां पीडितानां प्रार्थनापत्राणि गम्भीरतया श्रुतवन्तः। तदनन्तरं सम्बन्धितेभ्यः अधिकारिभ्यः स्थले एव गत्वा जनशिकायतानां निष्पक्षतया परीक्षणं कृत्वा निर्धारितसमयसीमायां गुणवत्तापूर्णं निराकरणं कर्तुं निर्देशाः प्रदत्ताः।जिलाधिकारी सर्वान् सम्बन्धितान् अधिकारिणः निर्देशितवान् यत् जनसमस्यानां निराकरणे पूर्णसंवेदनशीलतां प्रदर्शयन्तु। निर्धनेभ्यः पीडितेभ्यश्च शीघ्रं न्यायं प्रदाय तान् प्राथमिकतया शासकीययोजनाभिः लाभान्वितान् कुर्वन्तु, माननीयमुख्यमन्त्रिणः निर्देशान् च कार्यरूपेण परिणमयन्तु।

जिलाधिकारी इदमपि निर्दिष्टवान् यत् जनश्रवणकार्यक्रमे आगच्छन्तः निर्धनाः, आवश्यकताग्रस्ताः, असहायाश्च जनाः यथासम्भवं साहाय्यं प्राप्नुयुः, स्वपात्रतानुसारं च शासकीय- योजनानां लाभं लभेरन्। सामान्यजनानां शिकायतानां प्रार्थनापत्राणां च समयबद्धं सन्तोषजनकं समाधानं कर्तुं आक्षेपकर्तृभिः सह स्वयम् सम्भाषणं कुर्वन्तु। पीडितस्य व्यथितस्य च मनोदशां सम्यक् अवगत्य तस्य भावनानां सम्मानं कुर्वन्तः पूर्णसंवेदनशीलतया समस्यायाः समाधानं कुर्वन्तु।

अस्मिन् सम्पूर्णसमाधानदिवसकार्यक्रमे आहत्य सप्तसप्ततिः (७७) शिकायतिप्रार्थनापत्राणि पञ्जीकृतानि, येषु त्रयाणां (०३) आक्षेपानां स्थले एव निराकरणं कृतम्। प्राप्तेषु प्रार्थनापत्रेषु राजस्वविभागस्य षट्त्रिंशत् (३६), पुलिसविभागस्य त्रिंशत् (३०), विकासविभागस्य सप्त (०७), समाजकल्याणविभागस्य एकम् (०१), अन्यविभागानां च त्रीणि (०३) प्रार्थनापत्राणि आसन्। एतानि सर्वाणि प्रार्थनापत्राणि सम्बन्धिताधिकारिभ्यः शीघ्रनिराकरणार्थं प्रेषितानि। अस्मिन् अवसरे उपजिलाधिकारी युगान्तरत्रिपाठी, जिलाविकासाधिकारी गजेन्द्रप्रतापसिंहः, तहसीलदारः विशालशाहः इत्यादयः सर्वे जनपदस्तरीयाः अधिकारिणः उपस्थिताः आसन्

माँ अष्टभुजी दुर्गामन्दिरे, हथनीकलायाम् आयोजितस्य राज्यस्तरीयस्य संस्कृतशिक्षक-व्याख्यातृ- प्रशिक्षणशिविरस्य षष्ठे दिवसे विविधविषयाणां प्रशिक्षणं सम्पन्नम्

हिमसंस्कृतवार्ताः- छत्तीसगढ़- संस्कृत-विद्यामण्डलम्, रायपुर, मुंगेली। छत्तीसगढ़ संस्कृतविद्यामण्डलस्य, रायपुरस्य तत्त्वावधाने माँ अष्टभुजी दुर्गामन्दिरे, हथनीकलायां, मुंगेलीजनपदे आयोजितस्य सप्तदिवसीयस्य राज्यस्तरीयस्य संस्कृतशिक्षक- व्याख्यातृप्रशिक्षणशिविरस्य षष्ठे दिवसे अर्थात् २१ नवम्बर २०२६ दिनाङ्के विविधज्ञानवर्धकानां शिक्षाप्रदानां च प्रशिक्षणसत्राणाम् आयोजनम् अभवत्। अस्मिन् शिविरे प्रदेशस्य विभिन्नेभ्यः क्षेत्रेभ्यः समागताः संस्कृतशिक्षकाः व्याख्यातारश्च उत्साहपूर्वकं सहभागितां निर्वहन्तः विविधविषयेषु प्रशिक्षणं प्राप्तवन्तः। अस्मिन् अवसरे छत्तीसगढ़- संस्कृत-विद्यामण्डलस्य अध्यक्षः राजेशकुमारराजपूतः, मन्दिरसमितेः अध्यक्षः सोनूरामठाकुरः, दुर्गामन्दिरस्य अध्यक्षः हेमन्तसिंहठाकुरः, सेवानिवृत्तः सैनिकः संरक्षकश्च विश्रामसिंहठाकुरः, मन्दिरस्य उपाध्यक्षः धर्मेन्द्रसिंहठाकुरः, पीताम्बरसिंहठाकुरः, शिविरसञ्चालिका नम्रताचन्द्राकरमहोदया च गरिमामयीम् उपस्थितिं प्रदत्तवन्तः। कार्यक्रमस्य शुभारम्भः सरस्वतीदेव्याः पूजनेन, वैदिकमङ्गलाचरणेन, पुष्पधूपसमर्पणेन च अभवत्। प्रशिक्षणशिविरस्य प्रथमसत्रे होमेश्वरप्रसादचन्द्राकरमहोदयेन योगस्य व्यायामस्य द्वितीयसत्रे असरीतावर्या, तपेश्वरवर्यः, रितेशवर्यः, हुकुमसायवर्यः, डॉ. रामबाबूमिश्रः, डलमनियावर्या, विनोददुबेवर्यः, संजयदुबेवर्यः, धनीरामवर्यः च इत्येतैः संस्कृतसाहित्यस्य विविधेषु पक्षेषु व्याख्यानानि प्रशिक्षणं च प्रदत्तम्। च अभ्यासः कारितः।







प्रशिक्षकैः संस्कृतसाहित्यस्य समृद्धपरम्परायाः, तस्य विशिष्टतानां शैक्षणिकमहत्त्वस्य च विषये प्रकाशः पातितः। प्रशिक्षणार्थिभ्यः महत्त्वपूर्णाः सूचनाः अपि प्रदत्ताः।

भोजनावकाशानन्तरं तृतीयसत्रे मनीषभार्गववर्यः, बालकृष्णत्रिपाठीवर्यः, पवनसायवर्यः इत्येतैः संस्कृतसम्भाषणस्य प्रशिक्षणं प्रदत्तम्। अस्मिन् सत्रे दैनिकजीवने संस्कृतभाषायाः प्रयोगः, सरलवाक्यरचना, प्रश्नोत्तराभ्यासः, व्यावहारिक-सम्भाषणस्य च अभ्यासः कारितः।चतुर्थसत्रे होमेश्वरप्रसादचन्द्राकरवर्यः, डॉ. रामबाबूमिश्रः, प्रीतमतिवारीवर्यः इत्येतैः निर्धारितविषयेषु प्रशिक्षणं प्रदत्तम्। विविधैः शैक्षणिकक्रियाकलापैः अभ्यासैश्च प्रशिक्षणार्थिनां ज्ञानस्य, अभिव्यक्तिकौशलस्य, अध्यापनदक्षतायाः च संवर्धनं कृतम्।

पञ्चमसत्रे मनीषभार्गवः, रामनिवासराठौरः, रोशनराजपूतः इत्येतैः संस्कृतक्रीडानाम् अभ्यासः कारितः। अनेन माध्यमेन क्रीडाभिः सह संस्कृतभाषायाः प्रयोगः, मनोरञ्जकशिक्षणपद्धतिः तथा भाषाधिगमस्य नवीनाः रोचकाः विधयश्च प्रशिक्षणार्थिभ्यः परिचिताः कारिताः।

सम्पूर्णदिवसस्य प्रशिक्षणसत्रेषु संस्कृतभाषायाः साहित्यस्य च विविधायामैः सह आधुनिकानां क्रियाधारित- शिक्षणपद्धतीनां च विशेषमहत्त्वं प्रतिपादितम्। प्रशिक्षणार्थिभिः सर्वाणि प्रशिक्षणसत्राणि ज्ञानवर्धकानि उपयोगीनि च इति अभिहितानि। एवं षष्ठदिवसस्य प्रशिक्षणकार्यक्रमः सफलतया सम्पन्नः।

झारखण्डस्य अष्टाशीतिः शिक्षकाः डीपीएस बोकारो- आयोजिते हिन्दीभाषाशिक्षणस्य विशेषप्रशिक्षणकार्यशालायां समुपस्थिताः



हिन्दीभाषा जनसशक्तीकरणस्य प्रभावशालिनि माध्यमम् अस्ति- डॉ. गङ्गवारः।

हिमसंस्कृतवार्ताः- सौरभः दे, बोकारो, भाषा केवलम् औपचारिकानुष्ठानैः न जीवति, अपि तु पठन-पाठन-लेखनाभ्यां तथा समसामयिकजीवने तस्याः सार्थकप्रयोगेणैव समृद्धा भवति। आधुनिककक्षाणाम् आवश्यकतानुसारं हिन्दीभाषाशिक्षणम् अधिकं रोचकं प्रभावपूर्णं च विधातुम् उद्दिश्य दिल्ली पब्लिक स्कूल (डीपीएस) बोकारोद्वारा शनिवासरे न्यू सरस्वती हाउस पब्लिकेशन्स इत्यस्य सहयोगेन विशेषा शिक्षकप्रशिक्षणकार्यशाला आयोजिता। अस्यां कार्यशालायाम् आयोजकसंस्थायाः डीपीएस बोकारो इत्यस्य शिक्षकाः सहितं बोकारो- धनबाद- राँची-नगराणां समीपवर्तिक्षेत्राणां च विभिन्नविद्यालयेभ्यः प्रायः अशीति-शिक्षकाः सहभागिताम् अकुर्वन्।कार्यशालायाः शुभारम्भः 'इतनी शक्ति हमें देना दाता...' इति प्रार्थनागीतस्य सुमधुरगायनेन सह दीपप्रज्वलनेन अभवत्। अस्मिन् अवसरे प्रमुखसंसाधनव्यक्तित्वेन हिन्दीशिक्षाविद्, शोधकर्ता, पाठ्यसामग्रीविशेषज्ञश्च डॉ. मनीषः खारी, डीपीएस बोकारो-विद्यालयस्य प्राचार्यः डॉ. ए. एस. गङ्गवारः, न्यू सरस्वती हाउस इत्यस्य उपाध्यक्षः एस. एच. उस्मानी, महाप्रबन्धकः सन्तोषकुमारः, वरिष्ठोपप्राचार्यः अञ्जनीभूषणः, उपप्राचार्या शालिनीशर्मा, प्रधानाध्यापिका हिन्दीविभागाध्यक्षा च डॉ. सरिता गङ्गवारः उपस्थिताः आसन्।

संसाधनविशेषज्ञस्य आगन्तुकशिक्षकाणां च स्वागतं कुर्वन् प्राचार्यः डॉ. गङ्गवारः अवदत् यत् हिन्दीभाषा सांस्कृतिकाभिव्यक्तेः, जनसञ्चारस्य, राष्ट्रैकतायाश्च प्रभावशालिनी माध्यमं भवितुम् अर्हति। सा भारतस्य भाषिकवैविध्यस्य सम्मानं कुर्वती विद्यार्थिनः भाषायाः संवेदनशीलतया सृजनात्मकतया च सह संयोजयितुं समर्था अस्ति। केवलं कण्ठस्थीकरणं न, अपि तु भाषायाः सृजनात्मकप्रयोगः एव वास्तविकं भाषाशिक्षणम्। सः अवदत् यत् हिन्दीभाषा शिक्षितवर्गेभ्यः सामान्यजनसमूहेभ्यश्च समानरूपेण बोधगम्या अस्ति; अतः अस्यां भाषायां नवीनाः क्रान्तिकारी विचाराः व्यापकजनसमुदायं यावत् सहजतया प्रापयितुं शक्यन्ते। हिन्दीभाषा जनसशक्तीकरणस्य प्रभावशालिनि साधनम् अस्ति इति सः विशेषतया प्रतिपादितवान्।

संसाधनविशेषज्ञः डॉ. मनीषः खारी हिन्दीभाषायाः प्रभावशालिशिक्षणार्थं विविधाः व्यावहारिकोपायाः प्रस्तुतवान्। तेन राष्ट्रिय- पाठ्यचर्या- रूपरेखायाः आधुनिककक्षाणाम् आवश्यकताभिः सह सम्बन्धः स्पष्टतया विवेचितः। कृत्रिमबुद्धेः (AI) डिजिटल-प्रौद्योगिक्याः च सृजनात्मकसमायोजनेन पाठाः कथं अधिकं रोचकाः जीवन्तश्च भवितुम् अर्हन्ति इति सः उदाहरणैः प्रदर्शितवान्। पारम्परिकानां नीरसानां पुनरावृत्त्यभ्यासानां स्थाने क्रीडाधारितान् क्रियाकलापप्रधानान् च शिक्षणोपायान् स्वीकरणीयान् इति सः शिक्षकान् प्रेरितवान्। भाषा केवलं पठनीयविषयः न, अपि तु सृजनस्य अभिव्यक्तेश्च सशक्तं माध्यमम् अस्ति तथा सा संस्कृतेः जीवनधारा इव वर्तते इति प्रतिपादयन् डॉ. खारी कथाकथनम्, अभिनयं, नाट्याधारितं भूमिकानिर्वहणं, क्षमताधारितशिक्षणं, काव्यरचना, लघुकथालेखनं, संवादलेखनं च भाषाकौशलविकासस्य दैनन्दिनभाषाप्रयोगस्य च प्रभावशालिनः उपायान् निर्दिष्टवान्। कार्यशालायां परस्परसंवादः, समूहचर्चाः, व्यावहारिककक्षाक्रीडाः च विशेषाकर्षणम् अभवन्। 'चित्रं दृष्ट्वा दोहं परिचिनुत', 'शब्दप्रहेलिका', 'अन्त्याक्षरी', विज्ञापनलेखनं च इत्यादिभिः रोचकक्रियाकलापैः कार्यशालायां नवचैतन्यं समुत्पन्नम्। शिक्षकाः स्वानुभवान् परस्परं संविभज्य कक्षाशिक्षणसम्बद्धान् व्यावहारिकान् समस्याविषयान् च संसाधनविशेषज्ञेन सह चर्चितवन्तः।

कार्यक्रमस्य उद्घाटनसत्रस्य सञ्चालनं डीपीएस बोकारो- विद्यालयस्य शिक्षकः बलदेवप्रामाणिकः कृतवान्। वरिष्ठहिन्दीशिक्षिका पी. कलावती धन्यवादज्ञापनं कृतवती। विद्यालयस्य हिन्दीविभागस्य सदस्याः कार्यक्रमस्य सफलायोजने महत्त्वपूर्णं योगदानम् अददुः।

भारतीयसेनायां धर्मगुरुः राष्ट्ररक्षायै धर्मरक्षायै च संस्कृतछात्राणां कृते अद्भुतः अवसरः


सांकेतिकं चित्रम्

लेखकः श्री सदनानंद मिश्र, धर्म शिक्षक, भारतीय सेना

भारतीयसेना न केवलं देशस्य सीमानां रक्षणं करोति, अपितु सैनिकानां मानसिकं, नैतिकं, आध्यात्मिकं च बलं वर्धयितुम् अपि निरन्तरं प्रयतते। अस्मिन् क्षेत्रे 'कनिष्ठ-आयुक्त-अधिकारी धर्मगुरुः' इति पदं संस्कृतभाषायाः शास्त्रस्य च अध्येतृणां छात्राणां कृते राष्ट्रसेवायाः आत्मसम्मानस्य च एकः अद्वितीयः अवसरः अस्ति।

धर्मगुरोः भूमिका महत्त्वं च

युद्धक्षेत्रे विषमपरिस्थितिषु च सैनिकानां मनोबलं सुदृढं स्थापयितुं धर्मगुरोः भूमिका अत्यन्तं महत्त्वपूर्णा भवति। ते रेजिमेण्ट्-मध्ये धार्मिकानुष्ठानानां सम्पादनं कुर्वन्ति, सैनिकानां परिवारैः सह संवादं स्थापयन्ति, तेभ्यः नैतिकशिक्षां च यच्छन्ति। 'सर्वधर्मसमभावस्य' भारतीयसेनायाः आदर्शं परिपालयन्तः धर्मगुरवः सैनिकेषु राष्ट्रभक्तिं कर्तव्यनिष्ठां च जागरयन्ति।

नियुक्तेः स्थानं कार्यक्षेत्रं च

धर्मगुरोः नियुक्तिः भारतस्य विभिन्नभागेषु स्थितेषु सेनायाः रेजिमेण्ट्-क्रेन्द्रेषु, सीमाक्षेत्रेषु (यथा- लद्दाख, अरुणाचलप्रदेशः, जम्मू-कश्मीरः), शान्तिक्षेत्रेषु , तथा च विशेष-अवसरेषु संयुक्तराष्ट्रस्य शान्तिसेनायाम् अपि भवति। तेषां प्रमुखानि कार्याणि अधोलिखितानि सन्तिः

- **धार्मिकानुष्ठानानां सम्पादनम्:** रेजिमेण्ट्-मन्दिरेषु नित्यपूजा, हवनम्, उत्सवानां आयोजनं, तथा च नवसैनिकानां शपथग्रहणसमारोहे धर्मग्रन्थानां साक्ष्येण शपथदानं कारयितुम्।
- **मनोवैज्ञानिकः परामर्शः :** युद्धक्षेत्रे अथवा दुर्गमस्थानेषु कार्यरतानां सैनिकानां मानसिकतनावस्य निवारणाय आध्यात्मिकसंवादः प्रेरणाप्रदं प्रवचनं च।
- विपत्तौ युद्धे च सेवाः रुग्णालयेषु आहतसैनिकानां सान्त्वनम्,
- **सैनिकानां परिवारकल्याणम्:** सैनिकानां परिवारसदस्यानां मध्ये नैतिकमूल्यानां प्रसारः तथा सामूहिक-धार्मिककार्यक्रमाणां सञ्चालनम्।

अर्हताः योग्यता च

भारतीयसेनायाः अधिकारिक-अधिसूचनानुसारं 'पण्डित' तथा 'पण्डित (गोरखा)' पदयोः कृते अधोलिखिताः अर्हताः अनिवार्थाः सन्तिः

- **शैक्षणिकयोग्यता:** अभ्यर्थिना यू.जी.सी. मान्यताप्राप्त-विश्वविद्यालयात् संस्कृतेन 'शास्त्री' (स्नातकः) अथवा 'आचार्यः' (स्नातकोत्तरः) इति उपाधिः प्राप्ता भवेत्। (अत्र सामान्य-बी.ए./एम.ए. संस्कृत-उपाधिः न मन्यते, केवलं शास्त्री/आचार्य-उपाधिः एव ग्राह्या अस्ति)।
- **धार्मिकयोग्यता:** शास्त्री-आचार्य-अध्ययने 'कर्मकाण्डः' मुख्यविषयरूपेण पठितः भवेत्, अथवा कर्मकाण्डे एकवर्षीयः डिप्लोमा प्राप्तः भवेत्।
- **आयुसीमा तथा लिङ्गम्:** अस्य पदस्य कृते केवलं पुरुषाः एव योग्याः सन्ति। तेषां वयः २५ तः ३४ वर्षपर्यन्तं भवेत्
- **शारीरिकमापदण्डाः :** अभ्यर्थिनः न्यूनतमम् औन्नत्यं १६० से.मी. (गोरखा-लद्दाखी-अभ्यर्थिनां कृते १५७ से.मी.), वक्षःस्थलविस्तारः ७७ से.मी. (५ से.मी. फुल्लनसहितम्), भारः च न्यूनतमं ५० कि.ग्रा. (गोरखा-कृते ४८ कि.ग्रा.) भवेत्।

चयनप्रक्रिया तथा लिखित-परीक्षायाः पाठ्यक्रमः

धर्मगुरोः चयनप्रक्रियायां अधिकारिक-नियमानुसारं सर्वप्रथमम् ऑनलाइन-लिखितपरीक्षा भवति, तदनन्तरं शारीरिकदक्षतापरीक्षा (१.६ कि.मी. धावनम्) चिकित्सापरीक्षा च आयोज्यते। लिखितपरीक्षायां प्रश्नपत्रद्वयम् भवतिः

- **प्रथमं प्रश्नपत्रम् (सामान्यज्ञानम् - :** अस्मिन् भारतस्य इतिहासः, भूगोलः, संविधानं, समसामयिकघटनाः, सामान्यविज्ञानं, भारतीयसेनायाः संरचना च सम्बद्धाः प्रश्नाः पृच्छ्यन्ते। (इदं केवलं योग्यतापरीक्षापत्रम् अस्ति)।
- **द्वितीयं प्रश्नपत्रम् (धार्मिकविषयः - :** अस्य अङ्काः अन्तिमचयनसूच्यां गण्यन्ते। अस्मिन् पत्रे षोडशसंस्काराः, दैनिकपूजाविधिः, हवन-यज्ञ-प्रक्रिया, पञ्चाङ्गज्ञानं, श्रीमद्भगवद्गीता, रामायणं, महाभारतम्, उपनिषदः, प्रमुखपुराणानि च अधिकृत्य प्रश्नाः भवन्ति।

सफलतायाः कृते महत्त्वपूर्णाः उपायाः

अस्मिन् पदे चयनं प्राप्तुं छात्राः अधोलिखितान् उपायान् अनुसरन्तुः

- **मन्त्राणां शुद्धोच्चारणम्:** साक्षात्कारे व्यावहारिकज्ञानस्य परीक्षा भवति। अतः स्वस्तिवाचनं, शान्तिपाठः, विवाह-अन्त्येष्ट्यादिसंस्काराणां मन्त्राणां च शुद्धं सस्वरं च उच्चारणम् अभ्यसनीयम्।
- **शारीरिकसज्जता:** सेनायाः कृते शारीरिकस्वस्थता अनिवार्था अस्ति। प्रतिदिनं १.६ कि.मी. धावनस्य नियमितः अभ्यासः करणीयः।
- **धार्मिकग्रन्थानां गहनम् अध्ययनम्:** यतोहि द्वितीयप्रश्नपत्रस्य अङ्काः एव मेधा-सूचीं निर्धारयन्ति, अतः कर्मकाण्डस्य, गीतायाः, रामायणस्य, पुराणानां च सूक्ष्मम् अध्ययनं करणीयम्।
- **संवादकौशलं व्यक्तित्वविकासः च:** धर्मगुरोः कार्यं सैनिकैः सह संवादस्थापनम् अस्ति, अतः आत्मविश्वासपूर्वकं स्पष्टतया च वक्तुं कौशलं विकसितव्यम्।अद्यतने युगे यदा संस्कृतछात्राः वृत्तिविषये चिन्तिताः दृश्यन्ते, तदा भारतीयसेनायाः 'धर्मगुरु'-पदं तेषां कृते आशायाः नूतनः किरणः अस्ति। अत्र न तु केवलम् उच्चं वेतनं, सम्मानजनकं नायब-सूबेदार पदं, सामाजिकी प्रतिष्ठा च लभ्यते, अपितु '

सुविधाभिः सशक्तीकरणम्- दिव्याङ्गबालानां स्वप्नानां भविष्यति नवोन्मेषः

फतेहपुरे त्रिषु शिविरेषु १७७ दिव्याङ्गबालाः लाभान्विताः, २९७ सहायकसाधनानि वितरितानि।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, उत्तरप्रदेशस्य फतेहपुरजनपदे समग्रशिक्षायोजनायाः, पीएम-श्री-योजनायाः च अन्तर्गतं आयोजितेषु त्रिषु शिविरेषु १७७ दिव्याङ्गबालाः लाभान्विताः अभवन्। तेषु समग्रशिक्षायोजनायाः १६५ बालकाः, पीएमश्री- योजनायाः च १२ बालकाः समाविष्टाः आसन्। एतेषु शिविरेषु बालानां कृते २९७ सहायकसाधनानि उपकरणानि च प्रदत्तानि।

अयं प्रयासः दिव्याङ्गबालानां शैक्षिकसहभागितायाः संवर्धनाय, तेषां व्यक्तिगतावश्यकतानुसारं समुचितसहयोगस्य उपलब्धतायै महत्त्वपूर्णं सोपानम् अस्ति। उत्तरप्रदेशस्य आधारभूत- शिक्षाविभागः समावेशीशिक्षायाः माध्यमेन प्रत्येकस्य बालकस्य प्रतिभायाः विकासाय, तस्य सर्वाङ्गीणविकासाय दृढसङ्कल्पेन निरन्तरं प्रयत्नशीलः अस्ति।



नवम्बरमासस्य द्वाविंशे दिने सायं षड्वादने ध्वनिष्यति सङ्केतध्वनिः, बस्तीजनेपदे भविष्यति कृत्रिमविद्युत्-प्रकाशनिरोधाभ्यासः

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, बस्ती। बस्तीजनपदे नवम्बरमासस्य द्वाविंशे (२२) दिने सायं षड्वादने सङ्केतध्वनिं श्रुत्वा कृत्रिम-विद्युत्प्रकाश-निरोधस्य पूर्वाभ्यासः प्रारप्स्यते।नागरिकरक्षा-विभागस्य वायुमार्गेण आक्रमणसूचनायाः, विद्युत्प्रकाशनिरोधस्य कृत्रिमाभ्यासस्य (२०२६) सज्जतां प्रति शुक्रवासरे जिलाधिकारीकार्यालयस्य सभागारे मुख्यराजस्वाधिकारी कीर्तिप्रकाशभारतीमहोदयस्य अध्यक्षतायां समीक्षा-समुपवेशनम् आयोजितम्। समुपवेशने सम्बन्धितविभागानाम् अधिकारिभ्यः परस्परसमन्वयेन अभ्यासं सफलतया सम्पादयितुं निर्देशाः प्रदत्ताः। सङ्केतध्वनिः श्रूयमाणे सति नागरिकैः स्वगृहेषु, आपणेषु, व्यावसायिक- प्रतिष्ठानेषु च सर्वाः विद्युत्प्रदीपाः निर्वापयितव्याः। प्रकाशः बहिः न दृश्येत, एतदर्थं विशेषसावधानता अपि पालनीया। प्रशासनेन स्पष्टं कृतं यत् अयं केवलं सुरक्षाव्यवस्थानां सज्जतायाः परीक्षणार्थं क्रियमाणः पूर्वाभ्यासः अस्ति। अतः नागरिकाः भयभीताः न भवन्तु, अपितु अपप्रचारात् दूरे स्थित्वा प्रशासनस्य सहयोगं कुर्वन्तु।

जनकल्याणस्य

सामाजिकसमरसतायाश्च अनुपमः सङ्गमः- सामूहिकविवाहसमारोहे ३९७ युगलानां परिणयः सम्पन्नः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, ललितपुरम्। जनपदस्य ललितपुरस्य गिन्नौटबाग- परिसरे अद्य मुख्यमन्त्रिणः सामूहिक- विवाहयोजनायाः अन्तर्गतं भव्यः सामूहिक- विवाहसमारोहः समायोजितः। अस्मिन् समारोहे ३९७ युग्लानां विवाहसंस्काराः पारम्परिक- रीतिरिवाजैः वैदिकमन्त्रघोषैश्च विधिपूर्वकं सम्पन्नाः। अस्मिन् पुण्यावसरे उपस्थितैः जनप्रतिनिधिभिः प्रशासनिकाधिकारिभिश्च नवदम्पतीनां सुखमयं समृद्धं च दाम्पत्यजीवनं भवेदिति शुभाशीर्वादाः प्रदत्ताः। योजनायाः अन्तर्गतं प्रतियुगलं एकलक्षरूप्यकाणां व्ययः क्रियते। तत्र एकविंशतिसहस्ररूप्यकाणाम् उपहारसामग्री नवदम्पतीभ्यः प्रदीयते। चतुःषष्टिसहस्ररूप्यकाणां धनराशिः कन्यायाः वित्तकोषे प्रत्यक्षतया प्रेष्यते। पञ्चदशसहस्ररूप्यकाणि च समारोहस्य आयोजनव्यवस्थासु व्ययीकृतानि सन्ति।
एवं सामूहिकविवाहयोजना आर्थिकरूपेण दुर्बलपरिवाराणां कन्यानां विवाहे सहाय्यं प्रदाय सामाजिकसमरसतायाः जनकल्याणस्य च उत्कृष्टम् उदाहरणं प्रस्तौति।

जनगणना-निर्वाचनकार्येषु नियुक्तान् शिक्षकान्

विद्यालयीयकार्येभ्यः कार्यमुक्तान् कर्तुं शिक्षकसङ्घस्य आग्रहः,

जिलाधिकारिणे समर्पितं ज्ञापनम्

हिमसंस्कृतवार्ताः वृजेशकुमारपाण्डेयः, बाराबङ्की, उत्तरप्रदेशः।

बाराबङ्कीजनपदे जनगणना, मतदातृसूच्याः विशेषसंक्षिप्तपुनरीक्षणं, निर्वाचनसम्बद्धेषु कार्येषु नियुक्तानां शिक्षकाणां, शिक्षामित्राणाम्, अनुदेशकानां च कार्यभारं न्यूनीकर्तुं विद्यालयीयकार्येभ्यः कार्यावधिपर्यन्तं कार्यमुक्तान् कर्तुम् आग्रह उत्थापितः।
अस्मिन् विषये उत्तरप्रदेशीयप्राथमिक-शिक्षकसङ्घस्य बाराबङ्कीशाखया दिनाङ्के २१ नवम्बर २०२६ तमे दिने जिलाधिकारिमहोदयाय (जिलामूलभूत- शिक्षाधिकारिणा माध्यमेन) ज्ञापनं समर्पितम्। ज्ञापने शिक्षकाणां द्विविधकार्यदायित्वात् मुक्तिः तथा विद्यालयेषु वैकल्पिकशिक्षणव्यवस्थायाः सुनिश्चितिः इति प्रमुखाग्रहौ प्रस्तुतौ। ज्ञापने उल्लिखितं यत् नवम्बर-मासस्य ३० दिनाङ्कपर्यन्तं स्वगणनाकार्यं भविष्यति तथा दिसम्बरमासस्य प्रथमदिनाङ्कात् गृहगणनाकार्यस्य प्रारम्भः भविष्यति। एतदतिरिक्तं मतदातृसूच्याः विशेषपुनरीक्षण-कार्ये, निर्वाचनकार्ये, प्रशिक्षणकार्यक्रमेषु च शिक्षकाणां निरन्तरनियुक्त्या विद्यालयीय-शिक्षणकार्यं क्षेत्रीयकार्यं च प्रभावितं भवितुम् अर्हति। एकस्मिन् एव समये विद्यालये अध्यापनकार्यं तथा राष्ट्रिय-निर्वाचनसम्बद्धदायित्वनिर्वहणं च एकेनैव कर्मचारिणा कर्तुं व्यवहारतः कठिनमिति सङ्घेन प्रतिपादितम्।

सङ्घस्य प्रमुखाः पञ्च आग्रहाः-

१. जनगणना, मतदातृसूच्याः विशेषपुनरीक्षणं,
२. निर्वाचनकार्येषु नियुक्तान् शिक्षकान्, शिक्षामित्रान्, अनुदेशकान् च तेषां कार्यावधौ विद्यालयीय- दायित्वेभ्यः स्पष्टतया कार्यमुक्तान् क्रियताम्।
२. येषु विद्यालयेषु शिक्षकाः शासकीयकार्येषु नियुक्ताः सन्ति, तत्र छात्राणाम् अध्ययनं निर्विघ्नं भवेत् इत्यर्थं वैकल्पिकाम् अथवा अतिरिक्तां शिक्षणव्यवस्थां सुनिश्चितां क्रियताम्।
३. अधिकृतजनगणना- निर्वाचनकार्यावधौ विद्यालये उपस्थितिनिवेदनस्य अनिवार्यता न स्थाप्यताम्।
४. उक्तावधौ कार्यस्थले अनुपस्थितिः अधिकृत-शासकीयदायित्वनिर्वहणरूपेण स्वीक्रियताम्। तेन वेतनस्य सेवासम्बद्धलाभानां च हानिः न भवेत्।
५. सम्बन्धितेभ्यः खण्डशिक्षाधिकारिभ्यः विद्यालयप्रबन्धनाय च स्पष्टाः निर्देशाः प्रेष्यन्ताम्, येन द्विविधकार्यदायित्वस्य अनावश्यकभ्रमस्य च स्थितिः न जायेत।

राष्ट्रहिताय शिक्षकसमुदायस्य प्रतिबद्धता

उत्तरप्रदेशीय- प्राथमिकशिक्षकसङ्घस्य मतम् अस्ति यत् शिक्षकसमुदायः राष्ट्रहिताय, लोकतान्त्रिक- प्रक्रियायै, शासनप्रदत्त-दायित्वनिर्वहणाय च पूर्णतया प्रतिबद्धः अस्ति। अस्य ज्ञापनस्य उद्देश्यं शासकीयकार्येषु बाधाम् उत्पन्नां कर्तुं न, अपितु शिक्षकाणां कृते समुचितकार्यपरिस्थितीनां निर्माणं तथा छात्राणां शिक्षणकार्यस्य अविच्छिन्नतायाः संरक्षणम् अस्ति। ज्ञापने सङ्घस्य जिलाध्यक्षेन अभियन्त्रा अभिषेकसिंहेन हस्ताक्षरं कृतम्।



कोऽपि मतदाता न वञ्चितः भवेत्! उत्तरप्रदेशे मतदातृसूचीनां विशेषसंक्षिप्तपुनरीक्षण-अभियानस्य आयोजनम्

वृजेशकुमारपाण्डेयः, लखनऊ, उत्तरप्रदेशस्य विधानसभानिर्वाचनक्षेत्रेषु मतदातृसूचीनां विशेषसंक्षिप्तपुनरीक्षणम्- २०२७ इत्यस्य अन्तर्गतं शनिवासरे, नवम्बरमासस्य २१ दिनाङ्के, प्रदेशस्य सर्वेषु मतदानकेन्द्रेषु विशेषाभियानदिवसस्य आयोजनं कृतम्। अस्मिन्नभियानदिवसे युवजनैः महिलाभिश्च अत्यन्तोत्साहेन सहभागिता कृता। ये नागरिकाः अद्य एतां प्रक्रिया पूर्णां कर्तुं न शक्तवन्तः, ते निराशाः न भवन्तु। नवम्बरमासस्य २२ दिनाङ्के, रविवासरेऽपि प्रदेशस्य सर्वेषु मतदानकेन्द्रेषु विशेषाभियानदिवसस्य आयोजनं भविष्यति।

नागरिकेभ्यः विशेषम् आह्वानम्-

१. विशेषाभियानदिवसे स्वमतदानकेन्द्रं गत्वा प्रारूपमतदातृसूच्यां स्वनाम अवश्यं परीक्षन्ताम्।
२. यदि मतदातृसूच्यां नाम नास्ति, तर्हि अर्हाः नागरिकाः प्रारूपमतदातृसूच्यां नामाङ्कनार्थं प्रपत्रम्- ६ पूरयन्तु।
३. मतदातृसूच्यां विद्यमानस्य कस्यापि विवरणस्य संशोधनार्थं प्रपत्रम्- ८ पूरयन्तु।अतः सर्वे नागरिकाः विशेषाभियानदिवसे सक्रियतया सहभागितां कुर्वन्तु तथा मतदातृसूचीं शुद्धां, समावेशिनीम्, अद्यतनां च कर्तुं स्वकीयम् अमूल्यं योगदानं प्रददतु।लक्ष्यम्—कोऽपि पात्रनागरिकः मतदातृसूच्यां नामाङ्कनात् वञ्चितः न भवेत्।

धानक्रयव्यवस्थायाः मन्दगतौ जिलाधिकारी असन्तुष्टः, केन्द्रप्रभारीणां स्पष्टीकरणम् आहूतम्





हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, जौनपुरम्। शासनस्य अभिप्रायानुसारं कृषकेभ्यः तेषाम् उत्पादितधानस्य न्यूनतमसमर्थनमूल्यं प्रदातुं तथा धानक्रयव्यवस्थां प्रभावपूर्णां पारदर्शिनीं च स्थापयितुं दिनाङ्के २०२६ तमस्य वर्षस्य नवम्बरमासस्य २१ तमे दिने जिलाधिकारी पुलिसाधीक्षकस्य सह विकासखण्डस्य बक्शा इत्यस्य अन्तर्गतं पी.सी.एफ. क्रयसंस्थायाः बी-पैक्स चुरामनपुर-धानक्रयकेन्द्रस्य आकस्मिकं निरीक्षणम् अकरोत्। निरीक्षणकाले केन्द्रे धानक्रयार्थम् आवश्यकाः सर्वाः व्यवस्थाः पूर्णाः दृष्टाः। किन्तु तावत्पर्यन्तं केवलात् एकस्मात् कृषकात् दश क्विण्टल परिमितं धान्यमेव क्रीतम् इति ज्ञातम्। इस धानक्रयस्य अत्यन्तं मन्दगतिं दृष्ट्वा जिलाधिकारी तीव्रं रोषं प्रकटितवान्। एतां स्थितिं शासनस्य अभिप्रायस्य प्रतिकूलां मत्वा सम्बन्धितकेन्द्रप्रमुखात् तथा पी.सी.एफ. संस्थायाः जनपदप्रबन्धकात् तत्कालं स्पष्टीकरणं प्राप्तुं जिलाखाद्यविपणनाधिकारिणं जौनपुरम् आदिष्टवान्। जिलाधिकारी स्पष्टम् आदिष्टवान् यत् धानक्रयकार्ये कस्यामपि प्रकारस्य शिथिलता न सह्यते। सर्वैः क्रयकेन्द्रप्रमुखैः कृषकैः सह निरन्तरं सम्पर्कः स्थापनीयः, केन्द्रेषु आवश्यकव्यवस्थाः सुनिश्चितव्याः, प्रतिदिनं निर्धारितसमये केन्द्रेषु उपस्थितैः शासननिर्धारितानां मानदण्डानां क्रयनीतेः च अनुसारेण धानक्रयकार्यं त्वरितं करणीयम्, येन कृषकाः स्वोत्पादितधान्यस्य विक्रये कस्यामपि असुविधायाः सम्मुखीभूताः न भवेयुः।

धानक्रयकार्ये कस्मिन्नपि स्तरे प्रमादः अथवा उपेक्षा दृश्यते चेत् सम्बन्धितकर्मचारिणः उत्तरदायित्वं निर्धारितं करिष्यते इति जिलाधिकारी सचेतितवान्। उल्लेखनीयं यत् जनपदे २०२६ तमस्य वर्षस्य नवम्बरमासस्य २० दिनाङ्कपर्यन्तं विभिन्नेषु धानक्रयकेन्द्रेषु २५३ कृषकेभ्यः कुलम् १२३३.७८ मेट्रिकटनमितं धान्यं क्रीतम् अस्ति। धानविक्रयार्थम् अधुना यावत् ४४९२ कृषकैः पञ्जीकरणं कारितम्, येषु २४३१ कृषकाणां सत्यापनकार्यं सम्पन्नम् अभवत्।

कृषकानां कृते विशेषानुरोधः

सर्वेभ्यः कृषकबन्धुभ्यः अनुरोधः क्रियते यत् ते स्वकीयम् धान्यं केवलं राजकीयधानक्रयकेन्द्रेषु एव विक्रयन्तु। अस्य कृते खाद्यविभागस्य जालपुटे "fcs.up.gov.in" अन्तर्जालमाध्यमेन पञ्जीकरणं कारयन्तु। पञ्जीकरणे अथवा धानविक्रय-सम्बद्धकार्येषु कस्यापि प्रकारस्य कठिनतायाः सति जौनपुरजनपदस्य जिलाखाद्यविपणनाधिकारिकार्यालये स्थापितेन नियन्त्रणकक्षेण (दूरभाषसङ्ख्या- ०५४५२-३५०८५७) अथवा निकटस्थेन धानक्रयकेन्द्रेण सम्पर्कं कृत्वा समस्यायाः समाधानं कारयितुं शक्नुवन्ति।

सङ्घर्षं सङ्कल्परूपेण स्वीकृत्य सफलतया निर्मितवती नूतनां कीर्तिम्



हिमसंस्कृतवार्ताः वृजेश कुमार पाण्डेय

अमरोहा-जनपदस्य पूर्वच्छात्रा निधिः प्रान्तीय-नागरिक-सेवा-परीक्षायां प्राप्तवती नवत्रिंशततमं स्थानम्।उत्तरप्रदेशस्य अमरोहा-जनपदस्य गङ्गेश्वरी-विकासखण्डान्तर्गतस्य कस्तूरबा-गान्धी-कन्या-विद्यालयस्य पूर्वच्छात्रा कुमारी निधिः प्रान्तीय-नागरिक-सेवा-परीक्षायां (पीसीएस्-२०२३) नवत्रिंशततमं स्थानं प्राप्य उल्लेखनीयं सफलतां प्राप्तवती। सम्प्रति सा गाजीपुर-जनपदे उपजिलाधिकारी-पदे नियुक्ता अस्ति।कस्तूरबा-गान्धी-कन्या-विद्यालये शिक्षां प्राप्य प्रशासनिकसेवायाः उच्चपदं प्राप्तुं तस्याः यात्रा अद्य प्रदेशस्य बालिकानां कृते प्रेरणास्रोतः अभवत्। तस्याः सफलता प्रमाणयति यत् परिश्रमेण, आत्मविश्वासेन, दृढसङ्कल्पेन च जीवनस्य लक्ष्याणि प्राप्तुं शक्यन्ते।उत्तरप्रदेशस्य आधारभूतशिक्षाविभागेन सञ्चालिता कस्तूरबा-गान्धी-कन्या-विद्यालय-योजना बालिकाभ्यः शिक्षायाः, स्वावलम्बनस्य, जीवनस्य च विविधेषु क्षेत्रेषु सफलतायाः नवीनावसरान् प्रददाति। निधेः उपलब्धिः अस्याः योजनायाः सार्थकतां प्रकाशयति तथा च अन्यासां बालिकानाम् अपि स्वप्नसाकाराय प्रेरणां यच्छति।

गोवा-राज्ये भारतीय-अन्ताराष्ट्रिय-चलच्चित्र-महोत्सवे (आई.एफ.एफ.आई.) बहुप्रतीक्षितस्य 'भारतीय-पैनोरमा'-विभागस्य औपचारिकम् उद्घाटनं सम्पन्नम्



पणजी (गोवा)। गोवा-राज्ये भारतीय-अन्ताराष्ट्रिय-चलच्चित्र-महोत्सवे (आई.एफ.एफ.आई.) बहुप्रतीक्षितस्य 'भारतीय-पैनोरमा' (Indian Panorama) इत्यस्य औपचारिकम् उद्घाटनं कृतम्। सूचना-प्रसारण-मन्त्रालयस्य सचिवेन श्रीचञ्चलकुमारेण अस्य शुभारम्भः कृतः। अस्मिन् अवसरे श्रीकुमारः भारतीयचलच्चित्रजगतः आरम्भात् अद्ययावत् जातायाः महत्त्वपूर्णायाः विविधतायाः उल्लेखम् अकरोत्। सः अवदत् यत् चलच्चित्रस्य अयं महोत्सवः देशस्य विभिन्नक्षेत्राणां विशिष्टभाषाः, संस्कृतीः, कथाः च अभिज्ञातुं एकः सार्थकः अवसरः अस्ति। राष्ट्रिय-चलच्चित्र-विकास-निगमस्य (एन.एफ.डी.सी.) अध्यक्षः श्रीमान् जी. कृष्णकुमारः अस्मिन् वर्षे निर्धारितस्य मुख्यविषयस्य (थीम) 'सीमाहीनाः कथाः' (स्टोरीज विदाउट बॉर्डर्स) इत्यस्य उल्लेखं कुर्वन् चलच्चित्रजगतः प्रति सूचना-प्रसारण-मन्त्रालयस्य प्रतिबद्धतां पुनः प्रतिपादितवान् तथा च गोवा-सर्वकारस्य आभारं प्रकटितवान्।

महोत्सवस्य निदेशकः श्रीमान् आशुतोषगोवारिकरः अवदत् यत् विगतेषु अनेकदशकेषु 'भारतीय-पैनोरमा' देशस्य समृद्धां सांस्कृतिकीं चलच्चित्रीयां च विविधतां प्रदर्शयितुम् एकं महत्त्वपूर्णं मञ्चं जातम् अस्ति। सः सूचितवान् यत् अन्तिमचयने हिन्दी, मराठी, कन्नड़, टूलू, लद्दाखी, कश्मीरी, आङ्ग्लभाषा च सहितं चतुर्दश (१४) भाषाणां चलच्चित्राणि सम्मिलितानि सन्ति। एतेषु 'वेब-सीरीज' (अन्तर्जाल-शृङ्खलाः) अपि सम्मिलिताः सन्ति।

समारोहे 'भारतीय-पैनोरमा'-विभागस्य उद्घाटन-चलच्चित्राणाम् अपि परिचयः कारितः।

चतुर्देशीय-कबड्डी-स्पर्धायां भारतस्योत्कृष्टः शुभारम्भः, बाङ्गलादेशः ७६-२१ अङ्कैः पराजितः

काठमाण्डू। काठमाण्डू-नगरे आयोजितायां चतुर्देशीय-कबड्डी-प्रतियोगितायां (चैम्पियनशिप) भारतस्य 'अण्डर-२०' (विंशतिवर्षात् न्यूनवयस्कानां) दलेन उत्कृष्टं शुभारम्भं कुर्वता बाङ्गलादेशस्य दलः ७६-२१ इत्यस्य महता अन्तरेण पराजितः। एकस्याम् अपरायां प्रतिस्पर्धायाम् आतिथेयेन नेपालेन थाईलैण्ड-देशस्य दलः ५६-५० इति षड्भिः अङ्कैः पराजितः।

अङ्कतालिकायां भारतं प्रथमे स्थाने तथा च नेपालः द्वितीये स्थाने विद्यते। अस्यां प्रतियोगितायां भारतम्, नेपालः, बाङ्गलादेशः, थाईलैण्डः च इति चतुर्णां देशानां दलानि सहभागितां कुर्वन्ति। 'लीग'-चरणे सर्वाणि दलानि परस्परं क्रीडिष्यन्ति। शीर्षस्थाने स्थिते द्वे दले श्वः अन्तिमस्पर्धायां (फाइनल्-मध्ये) परस्परं सम्मुखीभविष्यतः।

"पर्यावरणदृष्ट्या नद्यः महत्त्वम्"

अस्माकं भारतदेशः नदीभिः परिपूर्णः अस्ति। दीर्घाः- लघ्वीः नदीनां संख्या अपि गणयितुं न शक्नुमः। अस्माकं ऋषिभिः मुनिभिः च एतेषु नदीषु अनेकाः स्तोत्राः रचिताः। स्तोत्रस्य अर्थः अस्ति-"गीयन्ते स्तूयन्ते अनेन इति -----" स्तोत्रं येन स्तुति क्रियते तेन स्तोत्रम्।ऋग्वेदे विश्वामित्रऋषेः शतद्रुविपाशानद्यौ स्तोत्रम् अस्ति। रामायणे वाल्मीकऋषिणां कृता गङ्गा नद्याः नैसर्गिक वर्णनं स्तुतिश्च अस्ति।

आदिशङ्कराचार्यस्य गङ्गायमुनानर्मदा नदीनां वर्णनं स्तुतिश्च सुप्रसिद्धा अस्ति। जगन्नाथपण्डितस्य गङ्गालहरीस्तोत्रम् अतीव प्रसिद्धम् अस्ति। वासुदेवानन्दसरस्वती प्रत्येकनद्यां सुन्दरीरचना रचिताः सन्ति।प्राचीनकालात् मानववस्तीनां प्रमाणानि यदि पश्यामः तर्हि ते मोहनजोदरो,हराप्पा च रूपेण प्राप्यन्ते। तेषां विशिष्टं वैशिष्ट्यं यत् एते ग्रामाः सर्वे नदीतीरेषु स्थिताः आसन्। सिन्धु- गङ्गा- यमुना- नर्मदातटे अद्यापि सघनवस्तयः विद्यन्ते। अस्माकं पूर्वजाः नद्याः निरन्तरप्रवाहं अवलोक्य, तासां पर्यावरणीयमहत्त्वं ज्ञात्वा तासां तटे वसतयः स्थापितवन्तः। एकस्य सुभाषितस्य अनुसारम्-

"पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।
मूढैः पाषाण खण्डेषु रत्नसंज्ञा विधीयते।।"

सत्यमेव जलं मानवजीवनस्य महत्त्वपूर्णं सम्पत्तिः अस्ति। समुद्रजलं अमाप्यम्, तत्र कृषिः असम्भवः। परन्तु नदीजलं शीतलं, मधुरश्च भवति, येन कृषिः भवति। एतत् सर्वं ज्ञात्वा अस्माकं पूर्वजं नदीतीरेषु वस्तयः स्थापितवन्तः। देवताचिह्नानि मत्वा नद्यः पूजां कर्तुं प्रवृत्ताः। नद्यः चेतनदेवताः सन्ति। तासां महत्तमः गुणः तासां निरन्तरं प्रवाहः अस्ति। सर्वाधिकमहत्तवपूर्णं च यत् नद्यः सर्वदा ऋजुरेखायां प्रवहन्ति। न कश्चित नदी कदापि विपरितरुपेण प्रवहति। अतः मानवजीवनं नद्याः प्रतीकं मन्यते।

साधूनां जीवनश्च नद्यः इव स्वच्छं प्रवाहितम्। नद्यः न केवलं स्वतटेषु मनुष्याणां आश्रयं ददाति अपितु नक्रकच्छपमत्स्यादिषु असंख्य जलजीवेषु अपि आश्रयं ददति। तासां तटे असंख्यवृक्षैः स्थिताः सन्ति। अतः नद्यः जगन्माता/लोकमाता इति उच्यते।

नद्यः विषये अनेकाः स्तोत्राः वैदिककालतः सन्ति। नद्यः पर्यावरणं च एकस्यैव मुद्रायाः द्वौ पक्षौ स्तः। धर्मकार्येषु गङ्गायाः परमं स्थानं वर्तते।

"गङ्गे च यमुने चैव गोदावरी सरस्वती।
नर्मदे सिन्धुकावेरी जलेऽस्मिन् सन्निधिं कुरू।।"

स्नानकाले अयं श्लोकः पठ्यते।

"गायन्तं गमयति प्रापयति ज्ञापयति वा भगवत्पदं इति गङ्गा।" एतादृशी गङ्गाशब्दस्य व्युत्पत्तिः। वैज्ञानिकदृष्ट्या अपि गङ्गाजलं श्रेष्ठं मन्यते। यमुना- नर्मदाश्च महत्त्वं सर्वत्रं वर्णितम् अस्ति। यमुनाश्रीकृष्णयोः अखण्डबन्धनं महत्त्वं च प्रसिद्धम्। नर्मदा पश्चिमदिशि प्रवहती बृहतमा नदी अस्ति। नर्मदाकारणात् एव भारतम् उत्तरभारतं दक्षिणभारतं च विभक्तम् अस्ति। "नर्म {सुखं} ददातिति नर्मदा। "नर्मदा शब्दस्य व्युत्पत्तिः अस्ति। नद्यः क्षीरेण अस्मान् पोषयित्वा एतत् जगत् जीवन्ति। नद्यः शुद्धित्वात् शीघ्रं जलसंस्काराः भवति। भारते प्रत्येकस्मिन् गृहे गङ्गाजलेन् पूरिताः लघुघटाः सन्ति। नद्यः अध्यात्मस्य विद्यालयाः सन्ति। ताः सर्वविधमलं शुद्धयन्ति। नद्यः अस्मान् दानं समतां च उपदिशन्ति, अतः ताः दीक्षागुरु अपि उच्यन्ते। कटु सत्यम्-

"कहते है ग्यानी, दुनिया है पानी, पानी पे लिखी लिखाई।"

सज्जनाः सम्पूर्ण जगत् प्रवाहीजलवत् मन्यन्ते, अस्माकं जीवनं च जले लिखितम् अक्षराणि इव मन्यन्ते। नदीनां पर्यावरणस्य रक्षणम् अस्माकं कर्तव्यम् अस्ति। नद्यै नमः।



हिमसंस्कृतवार्ता
डॉ. वर्षा प्रकाश टोणगांवकर
लेखिका, पुणे (महाराष्ट्रम्)



हिमसंस्कृतवार्ताः , ईदरधीरजः

वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। एताः नूतनाः वार्ताः अतीव विचित्राः सन्ति। का प्रथमा वार्ता? कृपया वद।

काव्या- नमस्ते नन्दिनि। स्वागत-व्याहरणस्य कृते कृतज्ञताम् अर्पयामि तुभ्यम्। शृणु प्रथमां वार्ताम्। अमेरिकादेशे 'फोर्ट-स्टुअर्ट' इति सैन्यस्थाने एका अद्भुता घटना जाता। तत्रत्येन सैन्य-नायकेन सैनिकेभ्यः एकः विशिष्टः प्रस्तावः दत्तः। यदा जीटीयेसिक्स नामिका प्रसिद्धा सङ्गणक-क्रीडा आगता, तदा तस्याः क्रीडनाय चतुर्णां दिनानाम् अवकाशः घोषितः। किन्तु यैः सैनिकैः स्वीयः सैन्यसेवाकालः इतोऽपि वर्षद्वयं वा वर्षषट्कं वा यावत् वर्धितः, तेभ्यः एव अयम् अवकाशः दत्तः। क्रीडायाः कारणात् त्रयश्चत्वारिंशत्-सङ्ख्यकाः सैनिकाः अग्रे आगताः, तैः च अयं प्रस्तावः स्वीकृतः।

नन्दिनी- अहो! क्रीडायाः कारणात् वर्षद्वयस्य सैन्य-सेवा! एतत् तु अतीव विचित्रं हास्यकरं च वर्तते। अधुना द्वितीयां वार्तां शृणु। अमेरिका-देशे ब्रुक्लिन-नगरे एकस्मात् क्रूरात् उलूकात् महती समस्या उत्पन्ना। रात्रौ सायङ्काले च यदा जनाः मार्गे धावितुं भ्रमितुं च गताः, तदा सः उलूकः वृक्षेभ्यः वेगेन अधः पतितः। तेन अकारणं द्वादशाधिकानां जनानां शिरस्सु कण्ठेषु च नखैः प्रहृतम्। तेषां शरीरेभ्यः रक्तं प्रवृत्तम्, सर्वे नागरिकाः च अतीव भीताः। चिकित्सकैः तेभ्यः रक्षणार्थम् औषधं दत्तम्। वन्य-प्राणि-अधिकारिणः चिन्तयन्ति यत् उलूकेन जनानां चलन्तः केशाः आहारः इव दृष्टाः, अथवा तेन स्वस्य निवास-स्थानस्य रक्षणाय एवम् आचरितम्।

काव्या- सत्यम्! उलूकात् अपि नगर-वासिनां भयं जातं खलु। एषा वार्ता अतीव भयानका अस्ति। इदानीं तृतीयां दुःखदां वार्तां शृणु। सिनसिनाटी- प्राणिसङ्ग्रहालये 'फियोना'-नामिका एका प्रसिद्धा जलहस्तिनी उषिता। अधुना सा मृता। ततः चिकित्सकैः तस्याः शरीरस्य परीक्षा कृता। तस्यां परीक्षायाम् एकं दुःखदं कारणं दृष्टम्। सप्ताहद्वयात् पूर्वं कस्यचित् दर्शकस्य एकं तृण-शिरस्त्रं तस्याः स्थाने पतितम्। तत् शिरस्त्रं फियोनया भक्षितम्। तत् तस्याः लघु-अन्त्रस्य अन्तः प्रविष्टम्, तत्रैव च लग्नम्। तेन अवरोधेन तस्याः मृत्युः जातः। सप्तदशोत्तर-द्विसहस्रतमे वर्षे सा समयात् पूर्वं जाता, तथापि कष्टानि जित्वा जीविता। अतः सा सर्वेषां जनानां प्रिया जाता।

नन्दिनी- हन्त! एषा वार्ता तु अतीव दुःखदा अस्ति। दर्शकैः प्राणिस्थानेषु सावधानता पालनीया एव। अधुना चतुर्थीम् अन्तिमां च वार्तां वदामि। त्वया बृहत्पाद-नामकस्य रहस्यमयस्य वन-जीवस्य नाम श्रुतम् एव स्यात्। बहवः जनाः विश्वसन्ति यत् एषः विशालः लोमशः जीवः अमेरिकादेशस्य वनेषु वसति। पूर्वं तु एषा कथा केवलं कल्पना मता। परन्तु अधुना अमेरिका-वनसेवाविभागेन 'बृहत्पाद' विश्वासिभ्यः अप्रत्याशितं समर्थनं दत्तम्। तेन विभागेन बहूनि प्राचीन-पत्राणि प्रकाशितानि, अधिकारिभिः एका विशिष्टा सभा अपि आयोजिता। तेषु पत्रेषु गहनवनेषु प्राप्तानां विचित्र-दर्शनानाम्, विशाल-पद-चिह्नानाम्, अज्ञात-केशानां च वर्णनं लिखितम्।

काव्या- अद्भुतम्! यदि वन-विभागेन अपि एतानि पत्राणि प्रकाशितानि, तर्हि वनेषु अवश्यं किमपि रहस्यं निगूढम् अस्ति। अद्यतने कार्यक्रमे एताः विचित्राः वार्ताः श्रुत्वा मम बहु आनन्दः जातः। सस्नेहं कृतज्ञताम् अर्पयामि तुभ्यम्, नन्दिनि!

नन्दिनी- मम सौभाग्यं, काव्ये। सर्वेभ्यः दर्शकेभ्यः अपि अस्माकं कृतज्ञता। अद्यतनः कार्यक्रमः अत्रैव समाप्तः। पुनः मेलिष्यामः। नमो वः।